This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 379 विषय पुराण.
नांव कार्तिक महात्म्य.
लेखक/लिपीकार —.
पृष्ठ 40.
काळ शके १७८६ पूर्ण/~~अपूर्ण~~.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथकार्तिकमाहात्म्यप्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥मुनिश्रेष्ठावालखिल्याः सर्वलोकहितेच्छया॥ कलौक
लुषचित्तानांलोकानांदीनभाषिणाम्॥१॥ ज्ञानविज्ञानहीनानांशिश्नोदरसुखैषिणाम्॥ क्षणभंगु
रबुद्धीनांस्वार्थतत्परमानसाम्॥२॥ कथंप्रसन्नोभगवान्भविष्यतिजनार्दनः॥ श्रुतंचभास्करमु
खात्तद्व्रतमुत्तमम्॥३॥ नस्थिरंजायतेचित्तंक्षणमात्रंजपादिषु॥ बाह्यपूजासमर्थानामु
द्धारायसुखायच॥४॥ इहलोकेपरत्रापियेनपुण्यमवाप्यते॥ ॥वालखिल्याऊचुः॥ ॥सम्य
क्पृष्टंमुनिवरैःकलिबुद्धिप्रभंजिताः॥५॥ विचरंतिनरामूढानानामार्गोपसेवकाः॥ तेषामर्थेभा
स्करेणप्रोक्तंव्रतमनुत्तमम्॥६॥ ॥श्रीभास्करउवाच॥ ॥शृण्वनूरोभवंतोऽपिवालखि-
ल्याश्चनारद॥ सनकाद्याभवंतोऽपिशृण्वंतुव्रतमुत्तमम्॥७॥ मत्परिभ्रमणेनैवजायतेसचरा
चरम्॥ तथैववृद्धिमायातिजायतेंऽतर्हितंततः॥८॥ ब्रह्मविष्णुमहेशाद्यैरेकदाप्रार्थितस्त्वहम्
कथंतवगतिज्ञानंजायतेतद्वदस्वमे॥९॥ एवंतैःप्रार्थ्यमानोऽहिकृताःस्वांगांशसंभवाः॥ चत्वार
एवपुरुषायुगरूपामहोज्ज्वलाः॥१०॥ तत्राद्यःसात्विकःश्वेतवस्त्रमाल्यविभूषणः॥ ज्ञानमुद्रां
करेबिभ्रद्ध्यानस्तिमितलोचनः॥११॥ द्वितीयोराजसोजातोदंडपुस्तकधारकः॥ दातावदान्यः
शूरश्चकुलजातिविभागकृत्॥१२॥ तृतीयस्तामसोहोताप्रणीतापशुधारकः॥ पठन्वेदंगीतनृ
त्यकरलोकैःसमावृतः॥१३॥ चतुर्थोमदिरोन्मत्तःकराभ्यांलिंगपीडकः॥ स्कंधयोर्धृतयुवतिर्ह्री
सघूर्णितलोचनः॥१४॥ ॥श्रीसूर्यउवाच॥ ॥एतान्पृच्छंतुभोदेवाःकारणंमेगतेःखिलम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२८०००

का॰मा॰ उत्पत्तिस्थितिनाशायसर्वेषांपर्यटाम्यहम्॥१५॥इत्युक्त्वाभास्करस्तूर्णंमेदिनींतांव्यगाहयत्॥ब्रह्मा अ॰
१ द्याःपरिपप्रच्छुःकृतंज्येष्ठंशनैःशनैः॥१६॥ ॥देवाऊचुः॥ ॥कथंश्रीभास्करगतिःकथंकालांशकोभ १
वान्॥कएषवेषःकिंकार्यंतत्त्वयातूर्णमुच्यताम्॥१७॥ ॥कृतउवाच॥ ॥त्वंसृष्टोऽसियदारभ्यब्र
ह्मंस्तद्दिवसादितः॥प्रयुतेकंसप्तलक्षंद्व्ययुतंचाष्टसंज्ञकम्॥१८॥सहस्रंसौरवर्षाणांप्रेर्यंतेतुमया
जनाः॥ध्यानायतपसेज्ञानमोक्षसाधनकर्मणि॥१९॥मयिनास्तिनरःकोपिस्वल्पायुश्चिंतयान्वितः
ब्रह्मनिष्ठानराःसर्वेरविमंडलभेदिनः॥२०॥ ॥त्रेतोवाच॥ ॥एतस्मादुत्तरश्चाहंत्रेतोनामम
हाबलः॥नृणांसुखकरोत्यर्थंभ्रातृधर्मविनाशकः॥२१॥मयावर्णव्यवस्थात्रजातिभेदाःपृथक्पृथ
क्॥उत्पादिताराजनीतिःसौख्यानिविविधानिच॥२२॥उच्चावचास्तथाधर्माभ्रातृधर्मविनाशकाः
१२९६००० प्रयुतेकंद्विलक्षंचनवसंख्यायुतानिच॥२३॥षट्सहस्राणिमेमानंबुद्धिंसंप्रीणयाम्यहम्॥ ॥द्वाप
रउवाच॥ ॥शृण्वंतुदेवामद्वचोयुगानामुत्तमंयुगम्॥२४॥द्वापारंनामविख्यातंनानासौख्यप्रदा
८६४००० यकम्॥लक्षाणामष्टकंदेवाःषट्संख्यान्ययुतानिच॥२५॥सहस्राणांचतुष्कंचमत्कालस्यप्रमाण ८६४०००
ता॥अहंबुद्धिंप्रवक्ष्यामिसर्वेषांसुखहेतवे॥२६॥जैमिनेस्तुस्वरूपेणकर्ममार्गःप्रकाशितः॥वर्णभेदः
कृतोभ्रात्रासर्वेषांजीवनेविधिः॥२७॥विचारितस्तुतेनातोमयाधर्मःप्रकाशितः॥नामसाम्यंभविष्यं
तिमद्रूपास्तुसहस्रशः॥२८॥अन्योन्यतःशिरश्छेदाद्यास्यंतिविलयंध्रुवम्॥भ्रातृणांचैवसर्वेषामहं १
ज्येष्ठोस्मिदेवताः॥२९॥कलिरुवाच॥ ॥हाधिक्कष्टंकर्णकटुप्रोच्यतेभ्रातृभिःकथम्॥मन्माहात्म्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४३२०००

मजानद्भिरज्ञानैर्बुद्धिवर्जितैः॥ ३०॥ एतद्धर्मैर्विहीनोहंकलिः सत्यविवर्जितः॥ अयुतंचचतुर्लक्षंसहस्र-
द्वितयंतथा॥ ३१॥ मत्कालपरिमाणंतुप्रेरयामीदृशींधियम्॥ परस्त्रीगमनेद्यूतेचौर्येछद्मनिकूटके॥ ३२
॥ पैशून्येवृत्तिलोपेचमद्यमांसादिभक्षणे॥ सर्वेलोकाजारजाताः शिश्नोदरपरायणाः॥ ३३॥ वाममा
र्गरतामातृभगिनीभोगकारकाः॥ मयिस्वल्पायुषोलोकाबहुधाविधवांगनाः॥ ३४॥ वार्धकेबहुधा-
सर्वेनिर्धनारोगसंयुताः॥ ब्राह्मणाः शूद्रकर्माणः शूद्राब्राह्मणवृत्तयः॥ ३५॥ युद्धकूटाः सर्वजनाः पतिं
त्यक्ष्यंतिसंगरे॥ स्वल्पेनहेतुनानार्योभर्तृत्यागविधायकाः॥ ३६॥ जातिवंध्याः काकवंध्यामृतवंध्याभ
वंतिच॥ विद्यालक्ष्मीकलाद्याश्चनीचेष्वेवरमंतिच॥ ३७॥ दासीभोगरतालोकाः परित्यज्यकुलस्त्रिय
म्॥ एवंधर्मंकरिष्यामिभ्रातृधर्मविनाशकम्॥ ३८॥ एतन्ममस्वरूपंतुयोजानातिसपंडितः॥ सर्वध
र्मपरित्यक्तंमांजानीतयुगंकलिम्॥ ३९॥ ॥ देवाऊचुः॥ ॥ कलेस्तवसमोनास्तिकश्चिच्चित्तवि-
मोहकः॥ किंचिद्व्रतंवादानंवायेनमुक्तोभवेज्जनः॥ ४०॥ कृपांकृत्वावदक्षिप्रंविष्णुलोकंव्रजेद्यथा॥-
कलिरुवाच॥ ॥ अनूरुंवदताप्रोक्तंभास्करेणश्रुतंमया॥ ४१॥ मर्त्यापिस्वर्गगमनकारणंश्रूयतां
हितत्॥ ॥ सूर्यउवाच॥ ॥ द्वादशानांतुमासानांमार्गशीर्षोतिपुण्यदः॥ ४२॥ तस्मात्पुण्यफलः
प्रोक्तोवैशाखोनर्मदातटे॥ ततोलक्षगुणः प्रोक्तः प्रयागेमाघमासकः॥ ४३॥ तस्मान्महाफलः प्रोक्तः-
कार्त्तिकोजलमात्रके॥ एकतः सर्वदानानिव्रतानिनियमास्तथा॥ ४४॥ एकतः कार्त्तिकस्नानंब्रह्म
णातुलयाधृतम्॥ संततिश्चैवसंपत्तिः कलौयेषांप्रदृश्यते॥ ४५॥ अवश्यंतैः कृतंविद्धिकार्त्तिकस्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमादरात्॥स्नानंचदीपदानंचतुलसीवनपालनम्॥४६॥भूमिशय्याब्रह्मचर्यंतथाद्विदलवर्जनम्॥विष्णु
संकीर्त्तनंसत्यंपुराणश्रवणंतथा॥४७॥कार्त्तिकेमासिकुर्वंतिजीवन्मुक्तास्तएवहि॥नकार्त्तिकसमंधर्म्य
मर्थ्यंन्नोकार्त्तिकात्परम्॥४८॥नकार्त्तिकसमंकाम्यंमोक्षदानंनकार्तिकात्॥युधिष्ठिरेणधर्मार्थमर्था
र्थंन्चध्रुवेणच॥४९॥श्रीकृष्णेनतुकामार्थंमोक्षार्थंनारदेनच॥कृतमेतद्व्रतंतस्माच्छ्रेष्ठंकृष्णप्रियंच
हि॥५०॥ ॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येप्रथमोऽध्यायः॥ ॥अरुणउवाच॥ ॥
ब्रूहिभास्करसर्वात्मन्कदारभ्यव्रतंकृतम्॥सफलंजायतेसम्यक्काचपूज्यात्रदेवता॥१॥ ॥भास्क
रउवाच॥ ॥अहंविष्णुश्चशर्वश्चदेवीविघ्नेश्वरस्तथा॥एकोहंपंचधाजातोनाट्येसूत्रधरोयथा॥२
अस्माकंसर्वएवैतेनृभेदाविद्धिखगेश्वर॥तस्मात्सौरैश्चगाणेशैःशाक्तैःशैवैश्चवैष्णवैः॥३॥कर्त्तव्यं
कार्त्तिकस्नानंसर्वपापापनुत्तये॥सूर्यस्यप्रीतयेकार्यंतुलासंस्थेदिवाकरे॥४॥इषपूर्णांसमारभ्य
यावत्कार्त्तिकपूर्णिमा॥तावत्स्नानंविधातव्यंशिवसंतुष्टयेनरैः॥५॥देवीपक्षंसमारभ्यमहारात्रिचतुर्द
शी॥तावत्स्नानंविधातव्यंदेवीसंप्रियतामिति॥६॥गणपक्षंसमारभ्यकृष्णायांकार्त्तिकेभवेत्॥चतु
र्थीतावदेवस्यात्स्नानंगणपतुष्टये॥७॥एकादशींसमारभ्यआश्विनस्यासितेतराम्॥एकादश्यांकार्त्ति
कस्यशुक्लायांपरिपूर्यते॥८॥कृतंयेनतुतस्यस्यात्सरितुष्टोजनार्दनः॥नकार्त्तिकसमोमासोनका
शीसदृशीपुरी॥९॥नप्रयागसमंतीर्थंनदेवःकेशवात्परः॥प्रसंगाद्वाबलात्कारैर्ज्ञाताज्ञाताकृतंभवे
त्॥१०॥स्नानंकार्त्तिकमासस्यनपश्येद्यमयातनाम्॥स्नानार्थंचेन्नसामर्थ्यंदत्वान्यस्मैधनादिकम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥स्नातस्यतस्यहस्तस्यग्रहणात्पुण्यभाक्भवेत्॥अथवाकार्त्तिकस्नानंये कुर्वंतिद्विजातयः॥१२॥
तेषांप्रावरणंदत्वास्नानजंफलमाप्नुयात्॥राधादामोदरःपूज्यःकार्त्तिकेतुविशेषतः॥१३॥स्वर्णस्यवाथरौ-
प्यस्याप्यभावेशकलबजामपि॥मृज्जांवाचित्रजातांवाथवापिष्टविचित्रितताम्॥१४॥दामोदरस्यराधायाः
स्तुलस्याधोर्चयंतिये॥मूर्त्तितेसकलराज्ञेयाजीवन्मुक्तानसंशयः॥१५॥अपिपापसहस्राढ्यःकार्त्तिक-
स्नानतोनरः॥मुक्तोवश्यंसभवतिनात्रकार्याविचारणा॥१६॥कृतंयैःकार्त्तिकेमासिदीपदानंविधान-
तः॥दृश्यंतेयेरलभाजस्तेतएवप्रकीर्त्तिताः॥१७॥योवेदाभ्यासिने दद्याद्दीपार्थंतैलमादरात्॥कोवात-
स्यफलंवक्तुंभुवितिष्ठतिमानवः॥१८॥दीपदानासमर्थश्चेत्परदीपंतुरक्षयेत्॥तुलस्यभावेकर्त्तव्यापूजा
धात्रीतलेखग॥१९॥मुख्यपूजाविधानंतुकर्त्तव्यंसूर्यमंडले॥अप्रत्यक्षाःसर्वदेवाःप्रत्यक्षोभगवानयम्
॥२०॥सर्वेषामेवनेत्रोयंजगज्जीवयतेमृतम्॥एतदंशसमुद्भूतारुद्राद्याःसर्वदेवताः॥२१॥प्रत्यक्षोभगवा
नीशश्चवतुर्वेदेषुगीयते॥सर्वेदेवाःकालवशाःकालकालोदिवाकरः॥२२॥एतस्यमंडलेपूज्याःसर्वदेवाः
प्रयत्नतः॥एतदाराधनेशक्तःप्रतिमांपूजयेन्नरः॥२३॥प्रतिमातोधिकंपुण्यंब्राह्मणस्यतुपूजने॥अवि-
द्योवासविद्योवाब्राह्मणोमामकीतनुः॥२४॥प्रायःकलियुगेविप्राःशूद्राचारपरायणाः॥वाममार्गगताः-
प्रायःसंध्यास्नानविवर्जिताः॥२५॥ईदृशाअपिसंपूज्याब्रह्मबीजसमुद्भवाः॥महादुर्गंधयुक्तोपिगुण
वत्वात्कसेव्यते॥२६॥यथारसोलशुनजोद्विजाःपूज्याःप्रयत्नतः॥रुद्रशापवशाद्गावोविष्ठाभक्षणत
त्पराः॥२७॥तथापिताःपूजनीयालोकद्वयफलप्रदाः॥ब्रह्मबीजेष्वपिश्रेष्ठोकृतोपनयनस्तुयः॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माच्छ्रेष्ठतरः संध्यां यः करोति द्विजोत्तमः॥ ततोप्यधिगुणो ज्ञेयो यः स्नानं कुरुते द्विजः॥ २९॥ उत्कृष्टस्तु ततो-
ज्ञेयः स्यात्स्वाचारेण संयुतः॥ ततोप्यधीतशास्त्रस्तु वेदवेत्ता ततोपि च॥ ३०॥ वेदार्थवित्ततः श्रेष्ठः सदाचा
रपरायणः॥ अपरान्नरुचिः स्वस्त्रीनिरतः क्रोधवर्जितः॥ ३१॥ मध्यान्हे प्रयतः संध्यां यः करोति द्विजो-
त्तमः॥ अयाचितव्रतो होमी देवब्राह्मणपूजकः॥ ३२॥ विभज्याशी सत्यवादी द्विजो यत्र तु तिष्ठति॥ क-
लिकालोपसर्गाद्यास्तत्स्थले न विशंति हि॥ ३३॥ तस्मात्सर्वप्रयत्नेन कार्त्तिके द्विजमर्चयेत्॥ दरिद्रो दा
नपात्रं स्याद्विद्यावांस्तु विशेषतः॥ ३४॥ मोक्षायैकाकिने दद्याद्दानं द्रव्यच्युताय च॥ सपत्नीकाय धर्मार्थं-
विशेषेण कुटुंबिने॥ ३५॥ यत्सेवाकारिणे दत्तं दत्तं वार्धुषिकाय च॥ दासीशाय च यद्दत्तं यद्दत्तं छद्मकारि
णे॥ ३६॥ तीर्थप्रतिग्राहिणे च यद्दत्तं तीर्थभोजिने॥ धनुर्धराय यद्दत्तं दत्तं यत्प्रेतभोजिने॥ ३७॥ वैद्यविद्या
जीविने च तथा नक्षत्रसूचिने॥ ईदृशे दीयते दानं येनासौ नरकं व्रजेत्॥ सर्वत्र पूजयेद्विप्रं सपत्नीकं स्व
गोत्तम॥ विप्राभावे पूजनीया गावः कृष्णा मनोहराः॥ ३९॥ कपिला गोषु च श्रेष्ठा तदभावे तु पिंगला॥
तदभावे सिता तस्या अभावे च सितेतरा॥ ४०॥ तदभावे च या काचिद्दोग्ध्री वत्सेन संयुता॥ विष्णोर्मूर्त्तिर्जंगम म
तः स्थावरा तु प्रशस्यते॥ ४१॥ शूद्रस्थापितमूर्त्तीनां नमस्कारं करोति यः॥ पितृभिर्निरयं याति दशपूर्वैर्दशा
परैः॥ ४२॥ शूद्रार्चितस्य संस्पर्शाद्दहेदासप्तमं कुलम्॥ तस्माद्विचार्य विप्रैर्या स्थापिता तां समर्चयेत्॥ ४३॥
ततोपि या देवताभिः कृता सा भुक्तिमुक्तिदा॥ मूर्त्यभावे पूजनीयो ऽश्वत्थो वाथ वटोथवा॥ अश्वत्थरूपी वि- ३
ष्णुः स्याद्वटरूपी शिवो यतः॥ ४५॥ कार्त्तिके तुलसी शाकं तांबूलं वा नराधमः॥ अज्ञानात् ज्ञानतो वापि भुं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जानोनिरयंव्रजेत्॥ ४५॥ धात्रीछायातलेयेनसकृद्भुक्तंतुकार्त्तिके॥ दंपतीभोजनंदत्तमन्नदोषात्प्रमुच्यते॥ ४६॥
सपूर्णंकार्त्तिकेयस्तुसंपूज्यामलकींशुभाम्॥ राधादामोदरप्रीत्यैभोजनीयौचदंपती॥ ४७॥ पश्चात्स्वयंतुभुं-
जीतनश्रीस्तस्यक्षयंव्रजेत्॥ शालग्रामशिलाचक्रेनित्यंसंनिहितोहरिः॥ ४८॥ तस्मात्सर्वप्रयत्नेनशाल
ग्रामंप्रपूजयेत्॥ ४९॥ इतिसनत्कुमारसंहितायांकार्त्तिमाहात्म्येद्वितीयोऽध्यायः॥ २॥ ॥ ऋषयऊचुः॥
शिवस्यकिंकृतंगोभिःशप्तास्ताःकेनहेतुना॥ उत्कंठाजायतेस्माकंवालखिल्याब्रुवंतुनत्॥ १॥ वालखि-
ल्याऊचुः॥ ॥ एकदाहंसमारुह्यविधातासमुपागतः॥ कृत्वाचतुर्विधांसृष्टिंतत्कौतुकसमुत्सुकः॥ २॥ प
श्यन्हिमालयंदिव्यंनानामृगसमन्वितं॥ गंगादिकसरिद्भिश्चप्लाव्यमानमितस्ततः॥ ३॥ नानाऋषिग-
णाकीर्णंसिद्धगंधर्वसेवितम्॥ पक्षिणांकलनिर्ह्रादैर्मोहयंतंश्रुतिद्वयं॥ ४॥ नानापक्षिगणाकीर्णमगम्यंच
क्वचित्क्वचित्॥ क्वचिद्वृद्धश्रियंबिभ्रद्धिमेनभरितंक्वचित्॥ ५॥ मेघसंसर्गतःश्यामंछाययामेघजानया॥
पश्यन्त्सकौतुकंदिव्यंगंगाद्वारमुपागमत्॥ ६॥ तत्रापश्यन्ऋषीन्सर्वान्कार्त्तिकस्नानतत्परान्॥ विष्णु
भक्तिपरान्श्रेष्ठान्राधादामोदरार्चकान्॥ ७॥ वासुदेवजगंनाथहरेविष्णोजनार्दन॥ इत्यादिनामब्रु
वतोदृष्ट्वाकोपसमन्वितः॥ ८॥ ॥ब्रह्मोवाच॥ ॥इहदुर्बुद्धिताकस्माद्भवतांसमुपस्थिता॥ पितामहंप
रित्यज्यकोत्रदेवउपास्यते॥ ९॥ अहंसर्वस्यजगतःकर्तामांत्यज्यभूतले॥ आराध्यतेतद्वदध्वंनोचेच्छा
पंददाम्यहम्॥ १०॥ वसुंधराभवंतश्चनाशनीयामयाध्रुवम्॥ ॥वालखिल्याऊचुः॥ ॥इतिब्रह्मवचः
श्रुत्वात्रस्तास्तेऋषिसत्तमाः॥ ११॥ ध्यायंतश्चेतसाविष्णुंप्रत्यक्षोभूज्जनार्दनः॥ ॥विष्णुरुवाच॥ ॥निमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमात्रंत्वंब्रह्मन्विश्वस्यास्यतुपालकः॥१२॥नारायणःसोत्रविप्रैःपूज्यतेकार्त्तिकेसदा॥ ॥ब्रह्मोवाच॥ ॥
अहंपितामहःसाक्षाद्विश्वकर्त्ताजगद्गुरुः॥१३॥पूज्योस्मिसर्वलोकानांवेदानामितिसंमतम्॥ ॥वालखि
ल्याऊचुः॥ ॥एवंतयोर्विवदतोर्नकस्यापिपराजयः॥१४॥तदाविष्णुरुवाचेदंब्रह्मन्शृणुवचोमम॥आव-
योर्यच्चमाहात्म्यंसामर्थ्यंयत्तदावयोः॥१५॥महेशोवेत्तितत्त्वंतत्रन्यायोस्तुचावयोः॥ब्राह्मणास्तुतये-
त्युक्त्वाजग्मतुःकाशिकांप्रति॥१६॥प्रणिपत्यमहादेवंब्रह्मावचनमब्रवीत्॥ ॥ब्रह्मोवाच॥ ॥देवाकर्ण
यविश्वस्यकर्त्ताहंचपितामहः॥१७॥मदाज्ञानुचरोविष्णुःकथंपूज्योभविष्यति॥ ॥विष्णुरुवाच॥ ॥दे
वदेवमहादेवसदाधर्मासनस्थित॥१८॥कःश्रेष्ठआवयोर्मध्येसत्यंब्रूहिजगत्प्रभो॥ ॥शिवउवाच॥ ॥
एतन्ममहालिंगंकियदूर्ध्वंतलेकियत्॥१९॥योज्ञास्यत्येतदंतंसलोकेपूज्योभविष्यति॥तस्मादेकत्रयाहि
त्वंब्रह्मन्विष्णोत्वमेकतः॥२०॥एतद्वचःसमाकर्ण्यवेधाश्चोपरिसंययौ॥अधस्ताच्चगतोविष्णुर्ययौपंचशतं-
समाः॥२१॥विश्रांतःखेदखिन्नश्चनप्राप्तोंतस्तुतस्यच॥पुनःपरावृत्यययौप्रणमत्रुद्रमादरात्॥२२॥
॥रुद्रउवाच॥ ॥कथमंतोस्तिलिंगस्यकथ्यतांमधुसूदन॥कियद्भिर्दिवसैःप्राप्तःकिंचिन्हंतत्रविद्य
ते॥२३॥ ॥विष्णुरुवाच॥ ॥खेदखिन्नोस्मिभगवन्गताःपंचशतंसमाः॥सप्तपातालमुल्लंघ्य
तथाब्रह्मांडगोलकम्॥२४॥भास्करस्यातपोनास्तिततोप्यग्रेगतोस्म्यहम्॥तेजोरूपस्यलिंगस्यपारंप्रा
प्तोमयानतु॥२५॥इतिश्रुत्वावचस्तस्यतूष्णींभूयव्यवस्थितः॥ब्रह्मावर्षसहस्राणिययावूर्ध्वंसुदुःखि
तः॥२६॥विचारयन्मनस्येवकिंकर्त्तव्यंमयाधुना॥विष्णुनांतोयदाप्राप्तस्तदाश्रेष्ठोभविष्यति॥२७॥नप्राप्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वेत्तदातुल्यौजायेतांनौशिवाज्ञया॥तस्माच्छ्रद्यकरिष्यामियथास्यांलोकपूजितः॥२८॥इतिनिश्चित्य
मनसाकामधेनुमभाषत॥कामधेनोविधाताहंसाहाय्यंममशब्दतः॥२९॥त्वयाकार्यंसर्वथैवनोचेच्छा
पंददाम्यहम्॥अत्रसहाय्यकर्त्रीचत्वंभविष्यसिशोभने॥३०॥तदामनोरथान्पूर्णांस्तेकरिष्यामिसत्व-
रम्॥ ॥धेनुरुवाच॥ ॥भवान्यदाज्ञापयतितत्सर्वंकरवाण्यहम्॥३१॥शिवाग्रेकथयिष्यामिलिंगांतादागतं
त्वया॥ततोगांतांसमादायविधातासययौपुनः॥३२॥ददर्शमध्यमार्गेसौकेतकंकुसुमान्वितम्॥उवाचवच
नंसाधुब्रह्मातंकेतकंप्रति॥३३॥पुष्पोत्तमास्तुकल्याणंसहाय्यंक्रियतांमम॥शिवाग्रेकथ्यतांधातालिंगस्यां
तंगतस्त्वया॥३४॥इतिश्रुत्वाब्रह्मवाक्यंकेतकोपिसमाययौ॥ततोब्रह्माशिवपुरेगत्वाहास्यंचकारह॥३५॥ ॥ब्र
ह्मोवाच॥ ॥सहस्रवर्षैर्लिंगांतोमयादृष्टस्तवाखिलः॥नशक्तोवीक्षितुंचान्यास्त्वत्कृतत्वान्निरीक्षितः॥
॥३६॥इतिश्रुत्वावचस्तस्यक्रोधप्रस्फुरिताधरः॥ अंतक्रोधंसमासाद्यशिवोवचनमब्रवीत्॥३७॥ ॥शि
वउवाच॥ ॥विनातुसाक्षिणंब्रह्मन्नन्यायोवदतोभवेत्॥आनीयतांविश्वदर्शीसाक्षीविश्वासका-
रकः॥३८॥ ॥ब्रह्मोवाच॥ ॥एषाधेनुःकेतकोयंउभौतत्रैवसंस्थितौ॥प्रष्टव्यौतौमहादेवत्वयाशप
थपूर्वकम्॥३९॥ ॥शिवउवाच॥ ॥कृतघ्नानांतुयत्पापंयुवयोर्मस्तकेपतेत्॥यद्यसत्यंप्रभाषेतंलिंगां
तोवीक्षितोमुना॥४०॥ ॥धेनुरुवाच॥ ॥लिंगांतंतेगतोब्रह्मायदूर्ध्वंनास्तिकिंचन॥ततःपरावृत्त्ययथौम
यैतच्चविलोकितम्॥४१॥ ॥केतकउवाच॥ ॥त्वल्लिंगोर्ध्वेनिवसतामयादृष्टःपितामहः॥ततोप्यग्रेगतः
स्वेयंपरावृत्यसमागतः॥४२॥ततःपरावृत्त्ययथौममैतच्चविलोकितम्॥ ॥शिवउ०॥ ॥मिथ्याब्रूतेयोःधर्मोमां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰मा॰ विष्ठापतनितन्मुखे॥४३॥अपवित्रंमुखंतस्मात्तद्भविष्यत्यसंशयम्॥गवामंगेषुनिष्टंतिसर्वेदेवाःसवासवाः॥४४॥
५ पुच्छेषुसर्वतीर्थानिसर्वेधर्माश्चमस्तके॥मुखेषुसर्वपापानिब्रह्महत्यासमानिच॥४५॥शृणुकेतकतेपुष्पैर्नरोमा
मर्चयिष्यति॥लक्ष्मीसंततिहीनोसौरौरवंनरकंव्रजेत्॥४६॥शृणुब्रह्मन्नरोयस्तुजनस्त्वांपूजयिष्यति॥स
द्योभवत्यसौकुष्ठीदरिद्रोमृतसंततिः॥४७॥शृणुविष्णोमहाभागकार्त्तिकेस्मिन्जिनंत्वया॥तस्मात्त्वत्री
तयेलोकैःक्षूनंभवतिचाक्षयम्॥४८॥ब्रह्मांशकसमुद्भूतेपालाशेयस्तुभोजनम्॥कुर्यात्कार्त्तिकमासेसौ-
विष्णुलोकंप्रयास्यति॥४९॥गोशापकारणंप्रोक्तमित्थंकिंकथ्यतामथ॥५०॥ ॥इतिसनत्कुमारसंहि-
तायांकार्त्तिकमाहात्म्येगोशापकथनंनामतृतीयोऽध्यायः॥३॥ ॥ऋषयऊचुः॥ ॥पलाशत्वंकथंजा-
तंब्रह्मणःशंकरस्यच॥वटत्वंचतथाविष्णोःपिप्पलत्वंब्रुवंतुतत्॥१॥ ॥वालखिल्याऊचुः॥ ॥ब्रह्म
णाचपुरासृष्टाःसर्वेदेवाःसवासवाः॥मिलित्वासर्वएवैतेब्रह्माणवाक्यमब्रुवन्॥२॥ब्रह्मन्सर्वाधिकोरु-
द्रःसर्वदेवेषुपठ्यते॥कर्त्तुंतद्दर्शनंदेवगच्छामोभवतासह॥३॥इतींद्रादिवचःश्रुत्वासर्वदेवपुरोगमः॥ब्र
ह्माकैलासमगमन्नानादेवगणैर्वृतः॥४॥शिवद्वारंसमासाद्यदेवाःसर्वेपिसंस्थिताः॥नदृश्यतेद्वारपालः
शिवश्चाभ्यंतरेस्थितः॥५॥गंतव्यंवानगंतव्यमस्माभिःशिवसन्निधौ॥परावृत्याथवास्वस्वस्थानेगंत
व्यमेववा॥६॥एवंचिंतयमानैस्तैर्नारदोमुनिसत्तमः॥पुरोदृष्टोदेववृंदैस्तंप्रणम्योचुरुत्तमम्॥७॥ ॥दे-
वाऊचुः॥ ॥मुनेवेदविदांश्रेष्ठब्रूहिप्रश्नंसुशोभनम्॥किंकरोतिमहादेवोगंतव्यंवानवांतरे॥८॥ ॥ना- ५
रदउवाच॥ ॥चंद्रनाशदशायांतुदेवाःसंप्रस्थितागृहात्॥तस्मात्कश्चिन्महाविघ्नोभवतांसंभविष्यति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९॥ किंकरोतिशिवश्चेतिप्रश्नेरतिदशाविभोः॥ तस्मात्संभोगकार्येयंवर्ततेत्रिपुरांतकः॥ १०॥ ॥इंद्रउवाच॥ ॥
सर्वेषामेवदुःखानांनाशकर्तादिवस्पतिः॥ मय्यागतेकथंनाशोदेवतानांभविष्यति॥ ११॥ बिभीषणायदेवा-
नांवल्गनंकुरुतेमुनिः॥ इतींद्रस्यवचःश्रुत्वाव्याकुलोभून्मुनिस्तदा॥ १२॥ कथंमद्वचनंसत्यंभविष्यत्य-
द्यवज्रिणि॥ अद्यमद्वचनंशीघ्रंयदिसत्यंभविष्यति॥ १३॥ राधादामोदरमुदेकरिष्येकार्त्तिकव्रतम्॥ ए
वंसंचिंत्यमनसातूष्णींभूतोमुनीश्वरः॥ १४॥ इंद्रोविचारयद्देवैः किमिदानींविधीयताम्॥ ततइंद्रउवा
चेदंवन्हेमद्वचनंशृणु॥ १५॥ गृहीत्वाविप्ररूपंत्वंशिवस्याभ्यंतरेव्रज॥ यदिप्रसंगोस्त्यस्माकंतदावार्तानि
गद्यताम्॥ १६॥ यदिनास्तिप्रसंगश्चेद्याचकत्वेनयाहिच॥ अवध्यत्वादताड्यत्वाद्भिक्षुकत्वेनतंव्रज॥
१७॥ इतिदेवेंद्रवचनंश्रुत्वावन्हिस्तथाकरोत्॥ अभ्यंतरेददर्शेशंशिवयासहसंगतम्॥ १८॥ शिवया-
पिचदृष्टःसलज्जिताभोगमत्यजत्॥ कोसिकोसीतिसंपृष्टोभिक्षुकोहंक्षुधातुरः॥ १९॥ वृद्धोस्म्यथोस्मि
दीनोस्मिभोजनंदीयतांमम॥ तेनादृष्टमितिज्ञात्वापार्वतीतमभोजयत्॥ २०॥ सोपिभुक्त्वासमाचा
रंवक्तुंसंप्रस्थितोबहिः॥ तस्मिन्नेवक्षणेगुप्तोनारदःपार्वतीययौ॥ २१॥ शिरोनिधायपार्वत्याःपाद
योःसरुरोदह॥ अहोबालककिंजातंतच्छीघ्रमभिधीयताम्॥ २२॥ करोमिनिष्कृतिंतस्यसाध्यासा-
ध्यस्यवान्यथा॥ मातर्वक्तुंनशक्नोमित्युपहासस्यकारणम्॥ २३॥ कृतंयथेंद्रादिदेवैस्तथाकोन्यःक
रिष्यति॥ इतिश्रुत्वावचस्तस्यपुनःपुनरपृच्छत॥ २४॥ मुद्रयित्वाततोनेत्रेकराभ्यांसमुनीश्वरः॥ उवा
चवचनंनीचंसूर्खोसौगद्गदाक्षरम्॥ २५॥ इंद्रोयंयुवयोर्भोगंदेवताभ्योन्यवर्णयत्॥ युवयोश्चक्र-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानिंदातांश्रुत्वादुःखितोस्म्यहम्॥ २६॥ भोगविछित्तयेवन्हिः प्रेषितोद्विजरूपकः॥ अथवाकिमनेनापिकथने-
नममांबिके॥ २७॥ जगन्मातासिदेवित्वंकालेस्यादुपहास्यता॥ इतितस्यवचः श्रुत्वापार्वतीक्रुद्धमानसा॥ २८॥
स्फुरदोष्ठरक्तनेत्राद्दृष्ट्वातांनारदोययौ॥ गत्वादेवानुवाचेदंसंभोगाद्विरतोहरः॥ २९॥ अगम्यतांदर्शनार्थंदू
रतोसौविलोकितः॥ वन्हेर्मुनेर्वचःश्रुत्वादेवेंद्रः सगणोययौ॥ ३०॥ प्रणिपत्यमहादेवंकृतांजलिपुटोभवत्॥
दृष्ट्वातथाविधंशक्रंपार्वतीवाक्यमब्रवीत्॥ ३१॥ अहल्याजारदुष्टात्मन्सहस्रभगवासव॥ उपहासः कृतोमे
द्यफलंतस्यसमाप्नुहि॥ ३२॥ यावंत्यः संतिदेवानांज्ञातयः सर्वएवते॥ अजानंतः स्त्रीसुखानिशाखिनः सं
तुसस्त्रियः॥ ३३॥ इतिदेवीवचः श्रुत्वाकंपिताः सर्वदेवताः॥ ब्रह्मविष्णुमहेशाद्यास्तुष्टुवुर्जगदंबिकाम्॥ ३४॥
ततोदेवीप्रसन्नाभूद्देवेंद्रंवाक्यमब्रवीत्॥ देवामद्वचनंमिथ्यात्रिलोकेपिनजायते॥ ३५॥ तस्माद्वृक्षाःशतो-
वृक्षायूयंसर्वेभवंतुवै॥ इतिदेव्यावचः श्रुत्वाजातादेवास्तुपादपाः॥ ३६॥ अश्वत्थरूपीभगवान्वटरूपीसदा
शिवः॥ पलाशोभूद्विधाताचआम्रःशक्रोबभूवह॥ ३७॥ इंद्राणीसालताज्ञेयादेवानांयोषितस्तथा॥ माल
त्याद्याः पुष्पलताउर्वश्याद्याप्सरोभवन्॥ ३८॥ तस्मात्सर्वप्रयत्नेनकार्त्तिकेश्वत्थमर्चयेत्॥ यानारीकार्त्ति
केमासिलक्षंकुर्यात्प्रदक्षिणाः॥ ३९॥ राधादामोदरंपूज्यमंदवारेश्वतत्तले॥ दंपतीभोजयेद्राधादामोदररस
रूपिणौ॥ ४०॥ भोजयित्वासपत्नीकान्पश्चाद्भुंजीतवाग्यतः॥ वंध्यापिलभतेपुत्रंइतरासांतुकाकथा॥ ४१
॥ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे॥ अग्रतः शिवरूपायअश्वत्थायनमोनमः॥ ४२॥ विष्णोश्चप्र-
तिमाभावेकीर्त्तनंजागरादिकम्॥ अश्वत्थमूलेकर्त्तव्यंविष्णोराराधनंपरम्॥ ४३॥ सदासंन्निहितोवि- ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्णुर्द्विपत्सुब्राह्मणे यथा॥ पादपेषुचबोधिद्रौशालग्रामेशिलासुच॥ ४४॥ कार्त्तिकेमासिसंप्राप्तेयोनवद्धं तमा
चरेत्॥ यथाकरस्थितंरत्नंतथात्यजतिबालिशः॥ ४५॥ कार्तिकान्नापरोमासोविष्णुप्रीतिकरोभुवि॥ स्वल्प
क्लेशेनैवयस्मिन्मासेविष्णुःप्रसीदति॥ ४६॥ दुर्लभंमानुषंजन्मआर्यावर्त्तेततोपिच॥ ततोपिदुर्लभंज्ञानंज्ञात्वा
येतुनकुर्वते॥ ४७॥ व्रतंकार्त्तिकमासस्यतेनरामंदबुद्धयः॥ ब्रह्महत्यादिपापानांनाशनःकार्त्तिकोमतः॥ ४८॥
तमुत्सृज्यनरःकोसौयोन्यंधर्मंसमाचरेत्॥ अश्वत्थपूजास्पर्शेनकर्त्तव्याशनिवासरे॥ ४९॥ अन्यवारेश्व-
त्थसंगाद्दरिद्रोजायतेनरः॥ ५०॥ ॥ इतिश्रीसनत्कुमारसंहितायांकार्त्तिकमहात्म्येश्वत्थकथनंनामचतु
र्थोऽध्यायः॥ ४॥ ॥अनूरुरुवाच॥ ॥ मंदंविनाकथंजातोनस्पृश्यःपिप्पलोभुवि॥ एतदाख्याहिभगवन्
नुत्कंठाश्रवणेमम॥ १॥ ॥सूर्यउवाच॥ ॥देवैर्दैत्यैर्द्वापरांतेसमुद्रमथनंकृतम्॥ पुरोपायोविष्णुयुतैर्ब
लिराजादिसंयुतैः॥ २॥ मंथानंमंदरंकृत्वारज्जुंकृत्वातुवासुकिम्॥ ममंथुःपंचवर्षाणिततःफेनोप्यजाय
त॥ ३॥ ततोवर्षत्रयेणैवसमुत्पन्नासुराभवत्॥ ततोजाताकामधेनुर्वर्षेणैकेनमोखग॥ ४॥ वर्षार्द्धेरावतो
हस्तीवर्षात्सप्तमुखोहयः॥ त्रिभिर्मासैरप्सरसस्ततोवर्षेणचंद्रमाः॥ ५॥ ततोवर्षत्रयाज्जातंज्वालामा
लातिभीषणम्॥ कालकूटंविषंघोरंतद्ददाहजगत्त्रयम्॥ ६॥ तज्ज्वालाक्रांतदेहस्तुविष्णुर्नीलोबभूवह॥
हाहाकारोमहाञ्जातोत्रैलोक्येसचराचरे॥ ७॥ वयंतुचकिताजातास्तस्मिन्कालेखगोत्तम॥ स्वकरैर्ब्र-
ह्मतोयानिनिक्षिप्तानिधरातले ॥ ८ ॥ ततःसंप्रार्थितःशर्वोमयाधात्राचविष्णुना॥ कृपालुनाते
नपीतंविषंहालाहलाभिधम्॥ ९॥ तद्दाहविनिवृत्त्यर्थंधृतागंगास्वमस्तके॥ कृतालुलाटेचंद्रस्यकला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्पूरलेपनम् ॥१०॥ ततः कोदंडमभवद्धर्षोत्कंखश्चमासतः ॥ पारिजातस्ततोवर्षादभून्मासाच्चकौस्तुभः ॥११
॥ ततोज्येष्ठासमुत्संनाकाषायांबरधारिणी ॥ पिंगकेशारक्तनेत्राकूष्मांडसदृशस्तनी ॥१२॥ अतिवृद्धादंत
हीनाललज्जिह्वाघटोदरी ॥ यांदृष्ट्वैवचलोकोयंसमुद्विग्नःप्रजायते ॥१३॥ ततोभूच्चंचलापांगीसौंदर्यस्ये
वशेवधिः ॥ कृशोदरीस्वर्णवर्णापीनोन्नतपयोधरा ॥१४॥ दधत्क्षीरोदकंवासः कराभ्यांकमलस्रजम् ॥ य-
स्यादर्शनमात्रेणमोहितादेवदानवाः ॥१५॥ ततःपुनर्मथ्यमानाद्द्वादशाब्देस्तुसागरात् ॥ गृहीत्वापीयूषक-
लशंस्वयंधन्वंतरिर्ययौ ॥१६॥ आदौपीतामृतंदेवारत्नानिव्यभजंस्ततः ॥ सुरादत्तादानवेभ्योधेनुःसं-
स्थापितासुरैः ॥१७॥ ऐरावतःसुरेंद्रेणभानुनाश्वोहयेश्वरः ॥ देवैरात्ताश्चाप्सरसःकोदंडंशूलपाणिना
॥१८॥ पांचजन्योविष्णुनैवपारिजातस्तुविष्णुना ॥ गृहीत्वाकौस्तुभंविष्णुरपश्यच्चेंदिरामुखम् ॥१९
लक्ष्मीरपिहरेरास्यंदृष्ट्वाचाधोमुखीस्थिता ॥ सर्वेपश्यंतितांलक्ष्मींनकेनापिविभज्यते ॥२०॥ पश्यंत्यन्योन्य
मास्यानिस्तुवंतिचरमांपुनः ॥ ततःपितामहःप्राहशिवमंर्द्धांगधारकम् ॥२१॥ लक्ष्मीरियंकस्यदेयेत्यादि
शयपरमेश्वर ॥ सर्वान्दृष्ट्वाततोदेवान्रुद्रोवचनमब्रवीत् ॥२२॥ ॥रुद्रउवाच॥ ॥एषनारायणःसाक्षाल्लु
क्ष्मीयोग्योमतोमम ॥ तथापिप्रौढयालक्ष्म्याक्रियतांवास्वयंवरः ॥२३॥ ॥श्रीरुवाच॥ ॥देवदेवम
हादेवभक्तानुग्रहकारक ॥ निसृतंयत्तवमुखात्तन्मिथ्यानैवजायते ॥२४॥ ॥शिवउवाच॥ ॥आकार्य
तांसागरोस्याःपितापाणिग्रहायच ॥ तूर्णंकरोतुसामग्रींद्वादश्यामद्यकार्त्तिके ॥२५॥ ॥श्रीसूर्यउ-
वाच॥ ॥ततआकारितोधात्राकृतवैवाहकोनदीट् ॥ नारदोदत्तवान्लग्नंततोलक्ष्मीर्व्यजिज्ञपत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६॥ ॥श्रीरुवाच॥ ॥आदौज्येष्ठांसमुद्वाह्यकनिष्ठामुद्वहेत्ततः॥ एषपंथास्तुवेदोक्तस्तस्मादेषाविवाह्य
ताम्॥ २७॥ इतिलक्ष्मीवचःश्रुत्वासर्वेस्युद्विग्नमानसाः॥ अतःपरंकिंविधेयंकएतांवरयिष्यति॥ २८॥ इ
त्युद्विग्नान्सुरान्दृष्ट्वानारदोवाक्यमब्रवीत्॥ विष्णोतवातीवभक्तोमुनिरुद्दालकोमहान्॥ २९॥ ततो
विवाहार्थमेनांवरयिष्यत्यसंशयम्॥ ॥विष्णुरुवाच॥ ॥आकार्यतांमुनिवरउद्दालकइदंवचः॥
३०॥ श्रुत्वैवानीतएवैषोनारदेनमहात्मना॥ तंनम्रकंधरंदृष्ट्वाविष्णुर्वचनमब्रवीत्॥ ३१॥ ॥विष्णुरुवाच॥
उद्दालकमुनिश्रेष्ठगृहस्थस्याश्रमंविना॥ वृथातपस्याभवतितस्मात्पाणिग्रहंकुरु॥ ३२॥ समुद्रस्यतु
कन्येयंज्येष्ठानाम्नीपतिव्रता॥ एनांवरयत्वंविप्रकनिष्ठांवरयाम्यहम्॥ ३३॥ इतिविष्णुवचःश्रुत्वातू-
ष्णीमासीन्मुनीश्वरः॥ दत्वासमुद्रस्यहस्तेजलंतांनारदोर्पयत्॥ ३४॥ तदुत्तरक्षणेतस्मिन्श्रियःपा
णिग्रहःकृतः॥ लक्ष्मींकरेहरिर्धृत्वामुनींद्रंवाक्यमब्रवीत्॥ ३५॥ नयेमामाश्रमंमृषेतवतुष्टोस्मिस-
र्वदा॥ अहंगच्छामिवैकुंठंगच्छत्वंमुनिमंदिरम्॥ ३६॥ इत्युक्त्वानिर्गतोविष्णुर्वैकुंठंरमयासह॥ उ-
द्दालकोपितांगृह्यप्रययौस्वीयमाश्रमम्॥ ३७॥ होमधूम्रसमायुक्तंवेदध्वनिनिनादितम्॥ स्वकर्म
निष्ठविप्रेंद्रैर्व्याप्तमुद्दालकाश्रमम्॥ ३८॥ विलोक्यदुःखिताज्येष्ठापतिंवचनमब्रवीत्॥ ॥ज्येष्ठोवा
च॥ ॥शिरःपीडाकरश्चायमाश्रमोममवर्त्तते॥ नवसाम्यत्रभोस्वामिन्नयमामन्यमाश्रमम्॥ ३९
॥एवंसहस्रशस्तेनदर्शिताआश्रमाःखग॥ एकोपितस्यामनसिसमायातिनचाश्रमः॥ ४०॥ तदा
मुनिःपर्यपृच्छत्कीदृशंरोचतेस्थलम्॥ ॥ज्येष्ठोवाच॥ ॥रात्रौरात्रौगृहेयत्रदंपत्योःकलहोभवे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॥४१॥सकौलंधर्ममुत्सृज्ययत्रतिष्ठंतिवैजनाः॥द्यूतकारामद्यपाश्चयत्रवेश्योपगामिनः॥४२॥गुरुमा
तृद्विजातीनांद्वेष्टारोयत्रसंतिच॥नित्यंपरान्नंभुंजंतिअवाद्यंवादयंतिच॥४३॥येगृहमैथुनंकुर्युर्वेदनिं
दांप्रकुर्वते॥मैत्र्यंतरायायेलोकायत्रयत्रचसंतिच॥४४॥तत्रतत्ररतिर्मेस्तिनान्यस्थानेषुवर्त्तते॥
इतिश्रुत्वावचस्तस्यामुनींद्रोभृशदुःखितः॥परंचिंतार्णवेमग्नोमनस्येवव्यचिंतयत्॥४५॥योवा
सोममयोग्यस्कसोस्यावासोनरोचते॥अतःपरंकिंविधेयंविष्णुनाग्राहितास्त्रियम्॥४६॥स्वका
र्यसाधकादेवाभवंतिनपरस्यतु॥सुखंदुःखंनजानंतिकिंकार्यंतुमयाधुना॥४७॥अथवाजातएवा
स्यविवाहस्तुहरेःखलु॥एनांत्यज्यगमिष्यामिनान्यथामेतपोभवेत्॥४८॥विचार्यैवंस्वमनसितां
भार्यांवाक्यमब्रवीत्॥ ॥उद्दालकउवाच॥ ॥शृणुमद्वचनंकांतेअश्वत्थाधःस्थिराभव॥४९॥
शरत्कालस्यधर्मेणशिरःपीडाभविष्यति॥तस्मादहंगमिष्यामितवयोग्यंयथास्थलम्॥५०॥वि-
लोक्यतादृशंतत्रस्थानंयामिचमाशुचः॥इत्थमाश्वास्यतांज्येष्ठांपलायनमचीकरत्॥५१॥सा
पिस्थितातस्यमार्गमास्तूर्यंप्रदद्दर्शह॥सायंकालेततोजातेनिराशाभूत्तदागमे॥५३॥रुरोदक
रुणंदीनंत्रैलोक्यंबधिरंकृतम्॥वैकुंठेपिश्रुतंलक्ष्म्याविष्णुंसापिव्यजिज्ञपत्॥ ॥श्रीरुवाच॥ ॥
रोदनंश्रूयतेचाद्यमद्भगिन्याकृतंविभो॥गतस्त्वांत्यज्यसमुनिःसांत्वनायसमाव्रज॥५४॥श्रुत्वेत
द्वचनंलक्ष्म्याःखगारूढोजनार्दनः॥श्रियासहययौतत्रयत्ररोदितिसाचिरम्॥५५॥ ॥विष्णुरु
वाच॥ ॥ज्यानेज्येष्ठेविहायैवत्वांगतोसौमुनीश्वरः॥मदंशसंभवश्चायमश्वत्थोस्तिगयापुरे॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५६॥ बोधनामात्त्वमत्रैवचिरकालंस्थिराभव॥ तवैवानुचराःसर्वेवसंतिचपिशाचकाः॥५७॥ तैःसार्कं-
स्थीयतामत्रशोकंत्यक्त्वासुखीभव॥ अ᳚धार्कपुत्रयोगोस्तिसप्तमेसप्तमेहनि॥ ५८॥ भगिनीतेऽवश्यमे-
वमीलनायागमिष्यति॥ यैःस्पृश्यतेन्यवारेषुपिप्पलस्त्वद्गृहंव्रज॥ ५९॥ मंदवारेतुयैःस्पृष्टस्तत्रयास्यति
मत्प्रिया॥ इमामाश्वास्यवैकुंठंजगामसहरिःस्वयम्॥ ६०॥ तस्मान्मंदंविनानूनंनस्पृश्योश्वत्थपादपः
॥ इत्थमश्वत्थपूजांतुकुर्यात्कार्त्तिकमासके॥ ६१॥ नकार्त्तिकात्परोमासःसत्यंसत्यंब्रवीमिते॥ ज्येष्ठाख्या-
नंमयाऽऽ..कंशृण्वतांपापनाशनम्॥ ६२॥ अतःपरंब्रूहिवत्सकिमन्यच्छ्रोतुमिच्छसि॥ ६३॥ ॥ इतिसनत्कु-
मारसंहितायांकार्त्तिकमहात्म्येपंचमोऽध्यायः॥५॥ ॥ ऋषयऊचुः॥ ॥ कदास्नानंप्रकर्त्तव्यंकथंस्थेयं
दिनावधि॥ एतदाख्यातुमर्हंतिवालखिल्यास्तपोधनाः॥१॥ ॥ वालखिल्याऊचुः॥ ॥ रात्र्यांतुयांशा-
शेषायामुत्तिष्ठेच्छयनात्सुधीः॥ विष्णुंस्तुत्वाबहुस्तोत्रैर्दिनकार्यंविचारयेत्॥२॥ प्रातःस्मरामिभवभी-
तिमहार्त्तिशांत्यैनारायणंगरुडवाहनमंबुजनाभम्॥ ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवा-
रिजपत्रनेत्रम्॥३॥ प्रातर्भजामिभजतामभयंकरंतंप्राक्सर्वजन्मकृतपापभयापहत्यै॥ योग्राहवक्त्र-
पतितांघ्रिगजेंद्रघोरशोकप्रणाशनकरोधृतशंखचक्रः॥४॥ प्रातर्भजामिमनसावचसाचमूर्ध्नापादार-
विंदयुगलंपरमस्यपुंसः॥ नारायणस्यनरकार्णवतारणस्यपारायणप्रवणविप्रपरायणस्य॥५॥ श्लोक-
त्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः॥ लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः॥६॥ ब्रह्मामुरारिस्त्रिपुरांतका-
रीभानुःशशीभूमिसुतोबुधश्च॥ गुरुश्चशुक्रःशनिराहुकेतुःकुर्वंतुसर्वेममसुप्रभातम्॥७॥ पृथिवीसगंधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰मा सरसास्तथापःस्पर्शश्चवायुर्ज्वलितंचतेजः॥ नभःसशब्दंमहतासहैवकुर्वं॥८॥भृगुर्वसिष्ठःक्रतुरंगिराश्च-
९ मनुःपुलस्त्यःपुलहश्चगौतमः॥रैभ्योमरीचिश्च्यवनःस्मदक्षःकुर्वंतुसर्वे॥९॥सनत्कुमारःसनकःसनं
दनःसनातनोप्यासुरिपिंगलौच॥सप्त स्वराःसप्तरसातलानिकुर्वं॥१०॥सप्तार्णवाःसप्तकुलाचलाश्च
सप्तर्षयोद्वीपवनानिसप्त॥भूरादिकृत्वाभुवनानिसप्तकुर्वं॥११॥इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्वाःशृ
णुयाच्चतद्वत्॥दुःस्वप्ननाशस्त्विह सुप्रभातंभवेच्चनित्यंभगवत्प्रसादात्॥१२॥इत्यादिस्तुतिभिर्विष्णुं
स्तुत्वाहस्तावलोकनम्॥कुर्याद्वादर्पणंस्वर्णंदूर्वांगांमंगलंचयत्॥१३॥दृष्ट्वायामाद्बहिर्यायान्निशरेज
नवर्जिते॥ग्रामनैर्ऋत्यदिग्भागेरथ्यास्थानादिवर्जिते॥१४॥समप्रदेशेतुतृणान्यास्तीर्यमलमुत्सृजे-
त्॥दिशोनेक्षेतचसुरवंपिधायांबरखंडतः॥१५॥नश्वसेतनचष्ठीवन्नभाषेन्नचसंछिरेवत्॥गंधलेप
क्षयकरंततःशौचंसमाचरेत्॥१६॥एकालिंगेगुदेसप्तदशवामेकरेतथा॥उभयोःसप्तदातव्याःपा
दयोर्मृत्तिकात्रयम्॥१७॥एतदुक्तंगृहस्थानांद्विगुणंब्रह्मचारिणाम्॥त्रिगुणंतुवनस्थानांयतीनांचच
तुर्गुणम्॥१८॥एवंशौचंविधायाथोदंतधावनमाचरेत्॥दुग्धकंटकवृक्षांश्चहित्वास्याद्दंतधावनम्
॥१९॥सद्यासनंमृदुतरंदंतधावनमाचरेत्॥उपवासेनवम्यांचषष्ठ्यांश्राद्धतिथौरवौ॥२०॥अमायांदं-
तकाष्ठस्ययोगाच्छतकुलक्षयः॥कुर्याद्वादशगंडूषानतुक्तेदंतधावने॥२१॥गृहीत्वार्चनसामग्रींत-
तोहरिगृहंव्रजेत्॥तदभावेशिवगृहेदेव्यावाभास्करस्यच॥२२॥अथवातुगणेशस्यस्थानेपिप्पल ९
सन्निधौ॥गोष्ठेवाथनदीतीरेगत्वापूजांसमाचरेत्॥२३॥ततोगायेतनृत्येतपूजांकृत्वातुबुद्धिमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्॥ अशक्तोगायनाद्येषु गायकानेव पूजयेत्॥२४॥ तांडवेनापिनृत्यंति कार्त्तिके विष्णुसन्निधौ॥ यद्वानद्यापि
गायंतियांतितेवैष्णव पदम्॥२५॥दीपान्दद्याद्बहुविधान्कार्त्तिके विष्णुसन्निधौ॥ कार्त्तिकेमासिसंप्राप्तेगग
न स्वच्छतारके॥२६॥रात्रौलक्ष्मीः समायातिद्रष्टुंभुवनकौतुकम्॥ यत्रयत्रचदीपान्सापश्यत्यब्धिसमुद्भवा
॥२७॥ तत्रतत्ररतिंकुर्यान्नांधकारेकदाचन॥ तस्माद्दीपस्थापनीयः कार्त्तिकेमासिवैसदा॥ २८॥ लक्ष्मीरू
पार्थिनांप्रोक्तंदीपदानंविशेषतः॥ देवालयेनदीतीरेराजमार्गेविशेषतः॥ २९॥ निद्रास्थलेदीपदाता तस्य
श्रीः सर्वतोसुखी॥ दुर्बलस्यालयंवीक्ष्यदीपशून्यंतुयोददेत्॥ ३०॥ विप्रस्यवान्यवर्णस्य विष्णुलोके मही
यते॥ कीटकंटकसंकीर्णेदुर्गमेविषमस्थले॥ ३१॥ कुर्याद्योदीपदानानिनरकंसनगच्छति॥ एवंसंकीर्त्तनं
कृत्वानाडीद्वयनिशासुखे॥ ३२॥ आगत्यतोयनिकटेदेशकालादिचोच्चरेत्॥ स्मरेद्गंगादिकानद्योविष्णु
शर्वादिदेवताः॥ ३३॥ नाभिमात्रेजलेस्थित्वामंत्रमेतमुदीरयेत्॥ कार्त्तिकेहंकरिष्यामिप्रातःस्नानंजनार्द
न॥ ३४॥ प्रीत्यर्थंतवदेवेशदामोदरमयासह॥ नित्येनैमित्तिकेकृष्णकार्त्तिकेपापनाशन॥ गृहाणार्घ्यं
मयादत्तंराधयासहितोहरे॥ ३५॥ किरणाधूतपापाचपुण्यतोयासरस्वती॥ गंगाचयमुनाचैव पंचन-
द्यःपुनंतुमाम्॥ ३६॥ एतान्मंत्रान्समुच्चार्यमलस्नानंसमाचरेत्॥ ततस्तुपावमानीभिरभिषिंचेत्स्वम-
स्तकम्॥ ३७॥ अघमर्षणकंकृत्वावासःपरिदधेत्ततः॥ जान्हवीस्मरणंकुर्यात्सर्वतीर्थेषुमानवः॥ ३८॥
नान्यत्तीर्थंतुजान्हव्यांस्मरणीयंकदाचन॥ स्नानांगतर्पणंकृत्वाचांचलंपीडयेद्बहिः॥ ३९॥ यन्मयादू
षितंतोयंशारीरमलसंचयैः॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहम्॥ ४०॥ वस्त्राणि पीडनंकृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यात्तिलकंततः॥ ततःसंध्यामुपासीतस्वसूत्रोक्तेनवर्त्मना॥ ४१॥ ततःकार्योजपोदेव्या यावदर्कोदयोभ-
वेत्॥ एतत्प्रोक्तंरात्रिशेषकृत्यंदैवमथोच्यते॥ ४२॥ ॥इतिसनत्कुमारसंहितायांकार्त्तिकमहात्म्ये षष्ठोध्या
यः॥ ॥वालखिल्याऊचुः॥ ॥कार्त्तिकेदिनकृत्यंयत्तच्छृणुध्वंमुनीश्वराः॥ यस्मिन्कृते कार्त्तिकीयंसकलः
सफलोभवेत्॥ १॥ विष्णोःसहस्रनामाद्यंसंध्यांतेचपठेत्ततः॥ देवालयेसमागत्यपुनःपूजनमारभेत्॥ २॥
नृत्यगानादिकार्येषुप्रहरंदिवसंनयेत्॥ ततःपुराणश्रवणंयामार्धंसम्यगाचरेत्॥ ३॥ पौराणिकस्यपूजा
चतुलसीपूजनंतथा॥ कृत्वामाध्यान्हिकंकर्मभुंजीतद्विदलोज्झितम्॥ ४॥ बलिदानंवैश्वदेवमतिथीनांस
मर्पणम्॥ कृत्वाभुंक्तेतुयोमर्त्यःकेवलंचामृतंहितत्॥ ५॥ यथाशक्तिद्विजाभोज्याःप्रत्यहंवाथपर्वणि॥-
हविष्यभोजनंकुर्याद्धविष्यमथचोच्यते॥ ६॥ हैमंतिकंसितास्विन्नंधान्यंमुद्गायवास्तिलाः॥ कलाय-
कंगुनीवारावास्तुकंहिलमोचिका॥ ७॥ षष्टिकाःकालशाकंचमूलकंकेमुकेतरत्॥ कंदःसैंधवसामुद्रे-
गव्येचदधिसर्पिषी॥ ८॥ पयोनुधृतसारंचपनसाम्रहरीतकी॥ पिप्पलीजीरकंचैवनारिंगंचैवतिंतिणी
॥ ९॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवम्॥ अतैलपक्वंमुनयोहविष्याणिप्रचक्षते॥ १०॥ सर्वथै
वनभोक्तव्यमामिषान्नंतुकार्त्तिके॥ तत्सर्वदावर्जनीयंकार्त्तिकेतुविशेषतः॥ ११॥ दग्धमन्नंद्विपक्वंच
मसूरान्नंसवल्कलम्॥ उद्दालकाःपर्युषितमन्नमामिषमुच्यते॥ १२॥ वृंताकानिपटोलानितुंबिका
चकलिंगकम्॥ बिंबीफलानित्रपुसंफलंशाकेषुचामिषम्॥ १३॥ दोरकातुलसीचिल्लिछत्राकपो
स्तपत्रकम्॥ चक्रवर्तीराजगिरिःपत्रशाकेषुचामिषम्॥ १४॥ गृंजरंरक्तमूलंचपलांडुंलशुनंतथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सर्वदेवामिषाणिस्युःकार्त्तिकेस्मरणंत्यजेत्॥१५॥परमांसैःस्वमांसानियःपुष्णातिनराधमः॥परजन्म
नितस्यैवविष्ठायांजायतेकृमिः॥१६॥बालान्मृगान्पक्षिणोवातथाबालफलानिच॥घातयंतिदुरात्मा-
नोजायंतेमृतबालकाः॥१७॥सर्वाण्येकत्रदानानिसर्वतीर्थान्यथैकतः॥सर्वव्रतान्येकतश्चअहिंसाक
लयासमम्॥१८॥एवंविचार्यभुंजीयादन्नंविष्णुनिवेदितम्॥वैश्वदेवस्यांतरेतुयआगच्छतिभिक्षु
कः॥१९॥चांडालोवाथचोरोवाविष्णुरूपीनसंशयः॥सायंकालउषःकालेवैश्वदेवस्यचांतरे॥
॥२०॥अतिथिर्विमुखोयातिसतुदुःखस्यभाजनः॥एवभुंक्त्वाऽचमेत्पश्चाद्यथोच्छिष्टंनतिष्ठति॥२१
दंतोच्छिष्टंशलाकाभिर्निर्हरेन्नैवपीडयेत्॥दृढंयद्दंतसंलग्नमुच्छिष्टंतत्तुदंतवत्॥२२॥तंनिष्कासनतश्चे
त्स्यात्कदाचिद्रुधिरागमः॥चांद्रायणंचयंकुर्यात्तस्यसंशुद्धिहेतवे॥२३॥भक्षयेत्तुलसीवक्त्रशुध्य-
र्थंतीर्थवारिणा॥तुलस्याधारणंकार्यंकार्त्तिकेतुविशेषतः॥२४॥तुलस्यांसर्वतीर्थानितुलस्यांसर्व-
देवताः॥कार्त्तिकेमासितिष्ठंतिनात्रकार्याविचारणा॥२५॥यस्यैवमृत्युसमयेतुलसीमुखसंस्थिता
॥महापापोदुराचारःकीकटेवाथसंस्थितः॥२६॥नयात्यसौसंयमिनींविष्णुलोकेमहीयते॥तुलसी
मंजरीभिर्योविष्णावाथशिवस्यच॥२७॥सहस्रनामभिःकुर्यात्पूजांयोभक्तितत्परः॥किंदानैःकिं
व्रतैस्तस्यसर्वपापैःप्रमुच्यते॥२८॥तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये॥केशवार्थंविचिन्वामि-
वरदाभवशोभने॥२९॥मंत्रेणानेनतुलसीस्तुग्राह्याहरितुष्टये॥अंगणेतुसमालोक्यतुलसीनांकदंब
कम्॥३०॥तद्गृहंनाविशंत्येवयमदूतानसंशयः॥यत्किंचिद्दीयतेदानंतुलस्याचसमन्वितं॥३१॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारंतुप्रयुक्तंतत्त्वनव्रजेन्नरकंनरः॥ संसारव्यवहारेणदिनशेषंसमापयेत्॥ ३२॥ सायंकालेपुनर्गत्वाहि-
ष्णोर्देवालयंमति॥ संध्यांकृत्वाप्रयुंजीततत्रदीपान्यथाबलम्॥ ३३॥ निशायाःप्रहरेचाद्येकुर्याज्जाग
रणंतथा॥ ब्रह्मचर्यव्रतंकुर्याद्भार्यामायाद्दतीनतथा॥ ३४॥ तयाकामयमानोवाभार्यांगच्छन्नदोषभाक्॥
हरिसंतुष्टयेकार्यस्त्यागोवास्वेष्टवस्तुनः॥ ३५॥ मासांतेद्विजवर्यायदद्यात्तद्व्रतपूर्त्तये॥ सर्वव्रतानिचै
कत्रसत्यव्रतमथैकतः॥ ३६॥ तस्मात्सर्वप्रयत्नेनसत्यंभाषेतसर्वदा॥ अन्यधर्मेष्वधिकृतिःकुलजाति
विभागतः॥ ३७॥ अधिकारीकार्त्तिकेतुसर्वएवजनोभवेत्॥ कलौकलुषचित्तानामुपायोनैववर्ततो॥ ३८
॥ उद्धारार्थंकार्तिकस्यव्रतंकुर्यात्प्रयत्नतः॥ तावद्गर्जंतिपापानिब्रह्महत्यादिकानिच॥ ३९॥ नकृतंका-
र्तिकस्नानंयावज्जंतुभिरादरात्॥ गोग्रासःकार्त्तिकेमासिविशेषाद्येस्तुदीयते॥ ४०॥ तेषांपुण्यफलं
वक्तुंनशक्नोतिपितामहः॥ विष्णुदेवालयंप्रातःसंमार्जयतिकार्त्तिके॥ ४१॥ तस्यवैकुंठभवनेजायते-
स्फुटंगृहम्॥ दद्यात्कार्तिकमासेतुधर्मकाष्ठानिभूरिशः॥ ४२॥ नतत्पुण्यस्यनाशोस्तिकल्पकोटिश
तैरपि॥ सुधादिलापयेद्यस्तुकार्त्तिकेविष्णुमंदिरे॥ ४३॥ चित्रादिकंलिखेद्वापिमोदतेविष्णुसन्निधौ
॥ रात्रिशेषेभवेत्स्नानमुत्तमंविष्णुतुष्टिकृत्॥ ४४॥ सूर्योदयेमध्यमंस्याद्यावन्नास्तातुकृत्तिका॥ ताव-
देवभवेत्स्नानमन्यथातंनकार्त्तिकम्॥ ४५॥ देवालयेवातीर्थेवाकृतोदुष्टैर्नृपैःकरः॥ तंमोचयंतियेलो
कास्तेषांधर्मःसनातनः॥ ४६॥ स्नानंस्त्रीभिर्विधातव्यंगृहीत्वाज्ञांधवस्यच॥ अपृष्ट्वायत्कृतंधर्म्यंभ
र्तारंतत्क्षयंनयेत्॥ ४७॥ स्त्रीणांनास्त्यपरोधर्मोभर्त्तारंप्रोज्झ्यकाश्यप॥ कुर्यात्सहस्त्रपापानिभर्त्ताज्ञां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यासमाचरेत्॥ ४८॥ सैषाधर्मवतीलोकेनजायेतव्रतादिना॥ दरिद्रः पिततो मूर्खोदीनोपि यदि चेत्सतिः॥ ४९॥ ता
दृशाःशरणंस्त्रीणांतत्यागान्निरयंव्रजेत्॥ ५०॥ ॥इतिसनत्कुमारसंहितायांकार्त्तिकमहात्म्येनियमक
थनंनामसप्तमोऽध्यायः॥ ॥अरुणउवाच॥ ॥कस्मिंस्तीर्थेविशेषेणफलंकार्तिकसंभवम्॥ क्षेत्रे
वाएतदाख्याहिभगवन्भूतभावन॥ १॥ ॥सूर्यउवाच॥ ॥यत्रकुत्रापिकर्त्तव्यंजलेस्नानंतुकार्त्तिके॥
उष्णोदकेनकर्त्तव्यंस्नानंकुत्रापिकार्त्तिके॥ २॥ ततोदशगुणंपुण्यंशीततोयनिमज्जनात्॥ ततःशतगु-
णंपुण्यंबहिःकूपोदकेकृतम्॥ ३॥ कूपात्सहस्रगुणितंफलंवापिनिषेवनः॥ ततोयुतगुणंपुण्यंतडागस्ना
नतोभवेत्॥ ४॥ ततोदशगुणंपुण्यंनिर्झरेषुनिमज्जनात्॥ ततोधिकतरंपुण्यंनदीस्नानस्यकार्तिके॥
५॥ नद्यादशगुणंप्रोक्तंतीर्थस्नानेखगोत्तम॥ ततोदशगुणंपुण्यंनद्योर्यत्रचसंगमः॥ ६॥ नदीत्रय
स्यसंयोगेपुण्यस्यांतोनविद्यते॥ सिंधुःकृष्णाचवेणीचयमुनाचसरस्वती॥ ७॥ गोदावरीविपाशा
चनर्मदातमसामही॥ कावेरीशरयूःक्षिप्रातथाचर्मण्वतीनदी॥ ८॥ वितस्तावेदिकाशोणोवेत्रवत्यप
राजिता॥ गंडकीगोमतीपूर्णाब्रह्मपुत्रसरोवरम्॥ ९॥ वाग्मतीचशतद्रुश्चतथाबदरिकाश्रमः॥ दुर्लभाः
कार्त्तिकेत्वेतेतीर्थान्यथनिबोधमे॥ १०॥ सर्वेभ्यश्चस्थलेभ्यश्चआर्यावर्त्तंतुपुण्यदम्॥ कोल्हापुरीततः
श्रेष्ठाततःकांचीद्वयंस्मृतम्॥ ११॥ अनंतसेनवसतिर्वराहःक्षेत्रमेवच॥ चक्रक्षेत्रंततःपुण्यंमुक्तिक्षे
त्रंततोधिकम्॥ १२॥ अवंतिकाततःश्रेष्ठाततोबदरिकाश्रमः॥ अयोध्याचततःश्रेष्ठागंगाद्वारंत
तोधिकम्॥ १३॥ ततःकनखलंतीर्थंततोमधुपुरीवरा॥ एकोपिकार्तिकोमासोमथुरायमुनाजले॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥ यैः स्नातस्तेतु वैकुंठे बहुकालं वसंति हि॥ राधादामोदरस्तत्र स्वयंस्नातस्तु कार्त्तिके॥१५॥ अतो मधुपु
रीश्रेष्ठा यमुनाच विशेषतः॥ द्वारावती ततः श्रेष्ठा प्रत्यहं स्नाति केशवः॥१६॥ षोडशस्त्रीसहस्रेण सार्धं या
दवसंयुतः॥ द्वारकायां मृत्तिकाया स्तिलको येन मस्तके॥१७॥ धार्यते सौ नरो ज्ञेयो जीवन्मुक्तो न संशयः
॥ द्वारकास्नानमाहात्म्यं न वक्तुं शक्यते मया॥१८॥ गोविंदार्पितचित्तानां जायते पुण्यभास्करः॥ ततो भा
गीरथी श्रेष्ठा यत्र विंध्येन संगता॥१९॥ तस्माद्दशगुणं पुण्यं तीर्थराजे प्रजायते॥ नामोच्चारणमात्रेण
गंगाया यत्फलं भवेत्॥२०॥ न तत्सहस्रतीर्थानां यानात्स्नानाद्भवाप्यते॥ गंगागंगेति यो ब्रूयाद्योजना
नां शतैरपि॥२१॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ येषां येषां तु पापानां प्रायश्चित्तं न विद्य
ते॥२२॥ तानि तानि विनश्यंति गंगाबिंदोस्तु स्पर्शतः॥ ये निंदंति नदीं गंगां ते नरा नरके कृमिः॥ अयं
ब्रह्मद्रवः साक्षात्महेशेन धृतः स्वके॥२३॥ ब्रह्मविष्णुमहेशाद्याः सर्वे गंगामुपासते॥ कलौ दशसह
स्रांते विष्णुस्त्यक्ष्यति मेदिनीं॥२४॥ तदर्धं जान्हवीतोयं तदर्धं देवतागणाः॥ यावत्तिष्ठति गंगात्र ताव
त्तीर्थानि संति च॥२५॥ स्वस्वस्थाने नृणां पापं तावद्देव हरंति च॥ यदैव गंगा नष्टा स्यात्को वा तत्पापमा
हरेत्॥२६॥ विचार्यैवं कृतीर्थानि गमिष्यंति धरातले॥ तस्मान्मुनीश्वराः सर्वे यावत्तिष्ठति जान्हवी
॥२७॥ तावच्चक्रियतां धर्मस्ततो भूमौ निलीयतां॥ समाधिं गृह्य स्कंद दां यावत्कृतयुगं भवेत्॥२८
अन्यथा कलिकालेन भ्रंशनीया भवेत्सुधीः॥ ततः श्रेष्ठतरा काशी यस्या नाशो न जायते॥२९॥ यदा
श्रयेण गंगापि सर्वपापं व्यपोहति॥ काशिकायां नैव नाशो ब्रह्मण्यपि मृतो सति॥३०॥ तथा काशीकृ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंकर्मस्कृतंचापिदुष्कृतम्॥ नैवनाशंसमायातिकल्पकोटिशतैरपि॥ ३१॥ यद्दर्शनार्थंगंगापिजाताचोत्तरवा-
हिनी॥ तस्यांपंचनदीतीर्थंत्रिषुलोकेषुविश्रुतम्॥ ३२॥ मयातत्रतपस्तप्तंप्रस्वेदात्किरणानदी॥ गभस्तीशा
दधोभागेगंगयासहसंगता॥ धूतपापापितत्रैवचद्धांशकसमुद्भवा॥ ३३॥ रुद्रांशकसमुद्भूतास्वयंभागीर
थीस्थिता॥ विष्णोरंशसमुद्भूतायमुनायत्रसंगता॥ ३४॥ ब्रह्मांशसंभवायत्रदृश्यतेतुसरस्वती॥ तीर्थंपं
चनदंनामभूमावेकंविराजते॥ ३५॥ आगतेकार्त्तिकेमासिरौरवंनरकंगताः॥ आक्रोशंतेतुपितरोऽ-
स्माकंभविष्यति॥ ३६॥ कश्चित्सभाग्यवतांश्रेष्ठोगत्वापंचनदेशुभे॥ अस्माकंतर्पणंकुर्यान्नरकार्ण
वतारकम्॥ ३७॥ तीर्थराजादितीर्थानिप्रासेकार्त्तिकमासिके॥ स्नानार्थंपंचगंगंतुसमायांतुनसंशयः
॥ ३८॥ कृत्वातुलक्षपापानिस्नात्वापंचनदेशुभे॥ बिंदुमाधवमभ्यर्च्य विलयंयांतितत्क्षणात्॥ ३९॥
जन्ममध्येसकृदपिस्नानंपंचनदेशुभे॥ बिंदुमाधवमभ्यर्च्यमुक्तोजन्मांतरेभवेत्॥ ४०॥ दद्याद्दीपंपं-
चनदेदीपंयोविधिपूर्वकम्॥ तस्यवंशेप्रजायंतेबालकाःकुलदीपकाः॥ ४१॥ कार्तिकेमासियोविप्रोगभ
स्तीश्वरसन्निधौ॥ शतरुद्रीजपंकृत्वामंत्रसिद्धिःप्रजायते॥ ४२॥ सर्वतीर्थानिगच्छंतितत्तत्तीर्थदिनेखलु-
लु॥ यात्रार्थंकाशिकास्थानिनयांतिक्वापिसारथे॥ ४३॥ तानिसर्वाणिचायांतिस्नातुंपंचनदेशुभे॥
मणिकर्ण्यपिचायातिपुर्यादीनांचकाकथा॥ ४४॥ दुर्लभोमानुषोदेहोदुर्लभाकाशिकापुरी॥ तत्रापि
कार्त्तिकेमासिपंचगंगंसुदुर्लभम्॥ ४५॥ येस्नातंकार्त्तिकेमासिसकृत्पंचनदेशुभे॥ सर्वतीर्थकृतात्स्ना
नात्फलंकोटिगुणंभवेत्॥ ४६॥ वाराणस्यांतुयेस्नात्वात्रिवर्षंकार्त्तिकव्रतम्॥ सोपांगंसांगंयैर्मर्त्यैःकृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्यैकतत्परैः॥४७॥ इहलोके फलं तेषां प्रत्यक्षं जायते खग॥ संपत्त्या चैव संतत्या यशोभिर्धर्मबुद्धिभिः॥ भवं
ति संयुता ब्रूहि किमन्यच्छ्रोतुमिच्छसि॥४९॥ ॥इति सनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये पुण्यतीर्थ
कथनं नाम अष्टमोऽध्यायः॥ ॥ऋषय ऊचुः॥ ॥कार्त्तिकस्य उपांगानि व्रतानि कथयंतु नः॥ कृतेषु ये
षु भवति संपूर्णं कार्त्तिकव्रतम्॥१॥ ॥वालखिल्या ऊचुः॥ ॥आश्विने शुक्लपक्षे तु भवेद्या चैव पूर्णि-
मा॥ तत्रादौ पूजनं कुर्यात्लक्ष्म्यो जागरणपूर्वकम्॥ २॥ नारिकेलोदकं पीत्वा अक्षक्रीडां समाचरेत्॥ नि
शीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी॥ ३॥ जगत्यत्र भ्रमते तस्या लोकचेष्टावलोकिनी॥ तस्मै वित्तं-
प्रयच्छामि यो जागर्ति महीतले॥ ४॥ सर्वथैव प्रकर्त्तव्यं व्रतं दारिद्र्यभीरुभिः॥ एतद्व्रतप्रभावेन वलितोप्यभ
वद्धनी॥५॥ ॥ऋषय ऊचुः॥ ॥वलितः प्रोच्यते कोसौ लब्धवान्स कुतो व्रतम्॥ एतद्विस्तरतो ब्रूत वालखि
ल्यास्तपस्विनः॥ ६॥ ॥वालखिल्या ऊचुः॥ ॥ब्राह्मणो वलितो नाम मागधः कुशसंभवः॥ नानाविद्या-
प्रवीणोसौ स्नानसंध्यापरायणः॥७॥ याचनं मरणतुल्यं मन्यते सौ द्विजोत्तमः॥ गृहागतं समृद्धानि
नान्यं याचयते क्वचित्॥८॥ तस्य भार्या महाचंडी नित्यं कलहकारिणी॥ मद्भगिन्यः स्वर्णरौप्यालं
कारादिविभूषिताः॥ ९॥ नानामाल्यांबरधरा दृश्या देवांगना इव॥ अहं दरिद्रस्य गृहे पतितास्मि दुरात्मनः॥
१०॥ लज्जा मां बाधतेत्यर्थं ज्ञातीनां सुखदर्शने॥ धिगस्तु चैतद्विद्याया निर्धनस्य कुलस्य च॥ ११॥ एवं व-
दति लोकेषु न करोति पतीरितम्॥ संकल्पं कुत्र वल्ल्येकं यद्यद्भर्त्ता वदिष्यति॥१२॥ विपरीतं करिष्यामि यथा १३
वल्लक्ष्मीः प्रसीदति॥ भर्त्तः पाषाणकुद्दालं चौर्यं कुरु नृपालये॥१३॥ अनीयतां धनं भूरि नो चेत्त्वां ताडया-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्यहम्॥ क्षणंरोदितिनाश्नाति कदाचिद्दहुरवादति॥ १४॥ साकपालंताडयति एवंक्लेशयते पतिम्॥ सोदांतस्या
स्तच्चरितंयाचनाद्दुःखभीतितः॥ १५॥ नोवाचवचनंकिंचिद्यथालाभेनतोषितः॥ एकस्मिन्श्राद्धपक्षेतुउ
द्विग्नोभूद्द्विजोत्तमः॥ १६॥ एतस्मिन्वत्सरेसर्वंश्राद्धसामग्रिकंगृहे॥ वर्त्ततेगृहिणीचेयंनकरिष्यतिकिं
चन॥ १७॥ इत्युद्विग्नमनाविप्रोभाषतेनचकिंचन॥ चिंतयाक्लिष्टमेवंतमाययौमित्रउत्तमः॥ १८॥ नाम्ना
गणपतिःख्यातस्तस्मिन्नभ्यागतेसति॥ नोवाचपूर्ववद्वार्त्तांमित्रंवचनमब्रवीत्॥ १९॥ भोभोवलितचि
त्तेतंकिमर्थंचिंतयान्वितम्॥ अवश्यंस्वधियाकुत्वाचिंतांतेनिर्हराम्यहम्॥ २०॥ ॥वलितउवाच॥ ॥
अधुनापितृपक्षेतुपितुःश्राद्धंसमागतम्॥ सामग्रिकंचास्तिगृहेविपरीतकरीप्रिया॥ २१॥ कथंसं-
पाद्यतेश्राद्धमितिचिंतायुतोस्म्यहम्॥ ॥गणपतिरुवाच॥ ॥धन्योसिकृतकृत्योसिभार्यायस्येदृ
शीगृहे॥ २२॥ ब्रूहित्वंवैपरीत्येनभार्याकार्यंकरिष्यति॥ वलितस्तुतथेत्युक्त्वासायंभार्यामभाषत॥
२३॥ अनर्थकारकेचंडीपरश्वःश्राद्धकंपितुः॥ नस्थापितंधनंयस्मान्मदर्थेयेस्तुपापकैः॥ २४॥ तस्मान्म-
पाकंशीघ्रंत्वंकुरुदुष्टेकरोषिचेत्॥ ब्राह्मणायेधूर्तकाराःशौचाचारविवर्जिताः॥ २५॥ निमंत्र्यास्तेत्वया
भद्रेनोत्तमास्तुकदाचन॥ इतिभर्तृवचःश्रुत्वासंभारस्तुमहान्कृतः॥ २६॥ निमंत्रिताश्चसद्विप्राःका
लेपाकस्तयाकृतः॥ विपरीतैरेववाक्यैःश्राद्धंसंपादितंतया॥ २७॥ पिंडदानंततःकृत्वाभार्यांवचनम
ब्रवीत्॥ विस्मृत्यपिंडान्नीत्वात्वंक्षिपगंगाजलेशुभे॥ २८॥ पिंडानीतास्तथेत्युक्त्वाशौचकूपेव्य पक्षि
पत्॥ तत्तज्ज्ञात्वावलितोदुःखीबभूवाकुलिताननः॥ २९॥ क्रोधाद्विनिर्ययौगेहात्संकल्पंकृतवानिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ लक्ष्मीर्यदि प्रसन्ना स्यात्तदान्नं भक्षयाम्यहम्॥ ३०॥ तावत्कंदफलाहारो वनमध्ये वसाम्यहम्॥ इति संक-
ल्प्य विप्रः स गहने निर्जने वने॥ ३१॥ एको धर्मनदीतीरे कृष्णवल्कलधारकः॥ विंशद्दिनानि न्यवसदागता
चैषपूर्णिमा॥ ३२॥ कालीवंशसमुद्भूता नागकन्याः सुलोचनाः॥ निवसंत्यो वने तस्मिन्व्रतं चक्रू रमाप्त
ये॥ ३३॥ श्वेतीकृततंतुसुधया गृहं चंद्रगृहोपमम्॥ मंडलानि विचित्राणि नानापिष्टैः कृतानि च॥ ३४
पंचामृतानि रत्नानि दर्पणाच्छादनानि च॥ स्थापयित्वेंदिरापूजा कृता ताभिः प्रयत्नतः॥ ३५॥ एवं तु प्रथमो या
मो बालाभिर्नीत एव हि॥ आरब्धं तु ततो द्यूतं तु यैस्ताः कनले भिरे॥ ३६॥ चतुर्भिस्तु विनाक्षाणां क्रीडनं नैव जा
यते॥ तस्मान्मृग्यस्तृतीयस्तु विचार्यैवं विनिर्गताः॥ ३७॥ कन्यकास्तु नदीतीरे ददर्श वलितं द्विजम्॥ ज्ञात्वा तं
साधुचरितं सचिंतं न सुखाकृतेः॥ ३८॥ उवाच वचनं चारु द्विज कोसि समागतः॥ याह्य यत्क्रीडितुं द्यूतं रमा-
प्रीतिकरं परम्॥ ३९॥ इत्थं तद्वचनं श्रुत्वा वलितो वाक्यमब्रवीत्॥ ॥ वलित उवाच॥ ॥ द्यूतेन क्षीयते लक्ष्मी
र्द्यूताद्धर्मो विनश्यति॥ ४०॥ मुग्धवद्वदसे किं त्वं कथं लक्ष्मीः प्रसीदति॥ ॥ कन्योवाच॥ ॥ भाषसे त्वं पंडित
वत्कर्मतेस्ति तु मूर्खवत्॥ ४१॥ इषस्य शुक्लपूर्णायां द्यूताल्लक्ष्मीः प्रसीदति॥ द्यूतक्रिडां तु कुरु त्वैव कौतुकं प
श्यचेंदिरम्॥ ४२॥ आरब्धं च ततो स्वस्य मंदिरम्॥ दत्वा तस्मै नारिकेलजलं भक्ष्यादि
कं तथा॥ ४३॥ आरब्धं च ततो द्यूतं श्रीलक्ष्मीः प्रीयतामिति॥ हापितानि च रत्नानि कन्याभिर्ब्राह्मणेन तु॥
४४॥ कौपीनं हापितं स्वीयं ताभिर्निर्जितमेव तत्॥ ब्राह्मणः क्रोधसंयुक्तः किं कर्तव्यं मयाधुना॥ ४५॥ उपवी १५
तं हापयित्वा ततः स्वीयं कलेवरम्॥ हापयिष्ये इति निश्चित्य उपवीतं लहापसः॥ ४६॥ ताभिर्जितं च तदपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रारीरंलापितंस्वकम्॥ ततोर्धरात्रेसंजातेलक्ष्मीनारायणावुभौ॥४७॥ आगतौलोकचरितंद्रष्टुंविप्रंददर्शतुः
॥ स्युपवीनंविकौपीनंचिंतयातिकृशीकृतम्॥४८॥ उवाचवचनंविष्णुःशृणुत्वंपद्मलोचने॥ नवव्रतकरोवि
प्रःकथंजातःसचिंतकः॥४९॥ तस्मादेनंकुरुक्षिप्रंलक्ष्मीवंतंस्वखोचितम्॥ इतिविष्णुवचःश्रुत्वापद्म-
यासौकटाक्षितः॥५०॥ बालाचिचहरोजातस्तत्क्षणंमदनोपमः॥ ततःकामेनसंविद्धास्तास्तिस्रोनाग-
कन्यकाः॥५१॥ विप्रायवचनंप्रोचुःशृणुविप्रतपोधन॥ यद्यस्माभिर्जितस्त्वंचेद्भर्तास्माकंवचोतुगः॥
५२॥ वयंत्वयानिर्जिताश्चेद्यथेच्छसितथाकुरु॥ इतितासांवचःश्रुत्वातथामन्येसचद्विजः॥५३॥ क्रीडना-
त्ताजिताःकन्यागांधर्वेणविवाहिताः॥ तासांरत्नानिताश्चापिगृहीत्वास्वगृहंययौ॥५४॥ प्राप्तंचंडितिरस्का
रान्मयेदंभाग्यमुत्तमम्॥ तस्मात्संमानितावंडीसापिप्रीताबभूवह॥५५॥ चकारस्वामिनश्चाज्ञामित्थं
लक्ष्मीव्रतंत्विदम्॥ बहुरात्रिव्यापिनीयासाचपूर्णाविशिष्यते॥५६॥ एवंलक्ष्मीव्रतंकृत्वानदरिद्रोनदुः
खभाक्॥ कथांश्रुत्वाविधानेनव्रतस्यापिफलंलभेत्॥५७॥ ॥इतिसनत्कुमारसंहितायांकार्त्तिकमहा
त्म्येइषपूर्णिमाव्रतकथनंनामनवमोध्यायः॥ ॥वालखिल्याऊचुः॥ ॥कृष्णादिमासक्रमतःकार्त्तिक-
स्यादिमासतः॥ आकाशदीपदानंतुकुर्वंतुऋषिसत्तमाः॥१॥ तुलायांतिलतैलेनसायंसंध्यासमागमे॥
आकाशदीपंयोदद्यान्मासमेकंनिरंतरम्॥२॥ सश्रीकायश्रीपतयेश्रियानसवियुज्यते॥ आकाशदी
पवंशस्तुविंशद्धस्तोत्तमोभवेत्॥३॥ मध्यमोनवहस्तस्यात्कनिष्टःपंचहस्तकः॥ यथादूरस्थितैर्लोकै-
र्दृश्यतेतत्तथाचरेत्॥४॥ तथाम्रादिकरंडेषुदीपदानंविशेष्यते॥ वंशस्यनवमांशेनलंबाकार्यापता-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किका॥५॥मयूरपिच्छमुष्टिंवाकलशंचोपरिन्यसेत्॥ विष्णुप्रीतिकरोदीपःपितृद्धारस्यकारकः॥६॥एका-
दश्यांतुलार्काद्वादीपदानमतोपिवा॥दामोदरायनभसितुलायांलोलयासह॥७॥प्रदीपंतेप्रयच्छामि-
नमोनंतायवेधसे॥आकाशदीपसदृशंपितुरुद्धारकंनहि॥८॥अत्रार्थेकथयिष्यामिचेतिहासंपुरातन
म्॥विप्रोभवच्चविंध्याद्रौहेलिकोनामतापसः॥९॥वेदशास्त्रप्रवीणश्चज्ञानविज्ञानसंयुतः॥तस्यपु-
त्रद्वयंजातंचित्रभानुर्मनोजवः॥१०॥वेदपाठादिनिरतावुभौधर्मपरायणौ॥द्यूतस्यव्यसनंजातंतयोर्दै
वस्ययोगतः॥११॥व्यसनेननतुतेनैवपितृद्रव्यंविनाशितं॥जातंपरस्त्रीव्यसनंयुवावस्थावतोस्तयोः॥
नजायतेनिर्धनानांद्यूतवेश्यास्त्रियोपिच॥१२॥चौर्यंविधीयतांतस्मादेवंमंत्रयतुश्चतौ॥चक्रतुस्त-
त्रचौर्याणिलोकेर्ज्ञातोविमावितिः॥१३॥ततःसंत्यज्यतंदेशंययतुर्गहनंवनम्॥मृगयाजीविनौजातौ
सर्वधर्मबहिष्कृतौ॥१४॥प्रातःस्नानंप्रकुर्वंतावेकंधर्मंसमाश्रितौ॥तस्मिन्वनेनिवसतिभिल्लीद्रोजि
लझिल्लिकः॥१५॥ननानीनामतत्कन्यासौंदर्यस्यैकशेवधिः॥दृष्ट्वातौतरुणौशूरावुभावपितयावृतौ॥१६॥
तयासर्वंपितुर्द्रव्यंताभ्यांसर्वंसमर्पितम्॥एकंधर्मंसापिचक्रेपित्रर्थंदीपदानकम्॥१७॥एकदातुतया
प्रोक्तौननान्याभ्रातरावुभौ॥अद्यमज्जनकश्चाद्दलुंठनीयोनकोपिहि॥१८॥उभावपिसुवांविप्रौमया
भोज्यौयथेप्सितम्॥अन्येपिकेचिद्विप्राश्चेन्मयाभोज्यास्तुसर्वथा॥१९॥ब्रह्मचर्यव्रतंचाहंयुवाम
पितथाविधौ॥मयासहनसंयोगःक्रियतामितिसाहतौ॥२०॥ततस्तयातिसंभारान्मांसानिविविधा
निच॥शाकपाकादिकंसर्वंतयानिष्पादितंततः॥२१॥ताभ्यांभक्तंयथेच्छान्नंबहुतीवकनीयसा॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्त्वजीर्णमभवदसाध्यमविलंबकम् ॥ ततःकालवशंप्राप्तोवनेतस्मिन्मनोजवः॥२२॥ बध्वायमभटैर्नीतः
संयमिन्यांचकुद्दितः॥ चित्रगुप्तस्ततंदृष्ट्वादूतान्वाक्यमथाब्रवीत् ॥२३॥ नयध्वेनंतुपापिष्ठमंधतामिस्त्रसंज्ञ
के॥ त्यजंतु कुंभीपाकेचशीर्षसंस्फोटयंतुच॥ २४॥ कुंभीपाकेततःक्षिप्तोनायंतस्मिंन्विपच्यते॥ अंधता
मिस्त्रकेक्षिप्तस्तत्रपश्यतिहृष्टवत् ॥२५॥ इत्याश्चर्ययुतादूताधर्मराजंव्यजिज्ञपुः॥ ॥दूताऊचुः॥ ॥-
कुंभीपाकेभिसंतप्तेक्षिप्तोस्माभिर्मनोजवः॥२६॥ नतस्यजायतेपीडास्नातिमर्त्योयथाजले॥ ॥यमउ
वाच॥ ॥आनीयतांततस्तूर्णंईषत्पुण्यंमनोजवम्॥२७॥ धर्मराजाज्ञयातेस्तुसमानीतोस्यसन्निधौ॥ दृ
ष्ट्वातंधर्मराजोपिदूतानाज्ञापयेदिति॥२८॥सदास्यस्नानशीलत्वात्कुंभीपाकोनबाधते॥ननान्याकल्पितोदीपः
पित्रर्थेगगनेशुभः॥२९॥निक्षिप्तएवतद्धस्ताच्चद्दिंशांशफलंतुतत्॥ अनेनलब्धंतस्यैवपुण्यंतामिस्त्रनाशन
म्॥३०॥पुण्यद्वयभरादस्यनिरयेवसतिर्नहि॥तस्मात्पिशाचदेहोयंक्रियतांकर्मभोगभाक्॥३१॥ ततःपि
शाचोभूत्वासौतस्मिन्नेववतुपिप्पले॥ गृहादिभ्योदत्तमन्नंभुक्त्वातत्रैवतिष्ठति॥३२॥ एकदातुचतुर्दश्यांसं
ध्याकालेउपस्थिते॥ कृष्णपक्षेदीपदानंकर्तुंपितृहितायसा॥ ३३ननान्युपगताभर्त्तामृगयार्थंक्वचिद्गतः॥
स्नातास्वच्छांबरंधृत्वानानालंकारभूषिता॥३४॥ यथौसादीपदानार्थंआक्रांतातेनरक्षसा॥ पूर्वजन्मनिसं
बंधोयेषांयेषांप्रजायते॥३५॥तएवभूतैर्धृष्यंतेनकदाचित्परेजनाः॥तेनधृष्टातुसाबालाक्षणान्मग्नाबभूव
ह॥३६॥भुक्त्वाभूषणकाद्यंचजहासचरुरोदच॥ गीतंगायतिचात्मानंकदाचित्ताडयत्यपि॥३७॥ नृत्यंच
कुरुतेक्वापिक्षणाद्धंत्वाश्वस्वादति॥सर्वेभिल्लाभिल्लपत्न्यस्तद्दासादासिकास्तथा॥ ३८॥ भ्रातृपुत्रादिकाः

सर्वेआगतास्तुसहस्रशः॥ कश्चिद्वदतिवातोयंकश्चिद्वक्तिपिशाचकः॥ ३९॥ डाकिनींशाकिनींकेचिदभिचारमथापरे॥ यक्षदेवंदानवंचधत्तूरादिकभक्षणम्॥ ४०॥ तर्कयंतिपरे लोकादुष्टजीवस्यदंशनम्॥ ध्रियतांबध्यतामेकेधूप्यतां दीप्यतांपरे॥ ४१॥ कश्चिन्मंत्रयतेतांचभेषजंचापिकुर्वते॥ एतस्मिन्नंतरेभर्त्राचित्रभानुःसमाययौ॥ ४२॥ आकारितास्तुमंत्रज्ञाउपायाबहवःकृताः॥ कंचित्ताडयतेसापिकंचिद्वदतिगच्छति॥ ४३॥ कंचिद्भीषयतेत्यर्थंवल्गत्यपिकदाचन॥ बलिदानादिग्रहाभिगच्छामीतिवदत्यपि॥ ४४॥ बद्धाक्वचिद्दोरकेणातिष्ठत्यतिविमूर्छिता॥ भिनत्त्युलूखलंक्वापिगृहंपातयतिक्वचित्॥ ४५॥ एकंजातालसाध्यासागृहमध्येनिवेशिता॥ एकदातेनमार्गेणबहुशःकेरलाजनाः॥ ४६॥ पंचह्रदोदकंगत्यकेरलेश्वरशासनात्॥ भाद्रेमासिप्रस्थितास्तेतद्गृहेवसतिःकृता॥ ४७॥ तेषांमध्येसुधीःकश्चिद्विप्रोपांचनदस्तवम्॥ अपठद्रामरक्षादिविष्णुपंजरकादिच॥ ४८॥ तच्छ्रुत्वातुपिशाचोसौजातःस्वस्थमानसः॥ संछेद्यबंधनाद्यंचत्यक्त्वाचेष्टांसंस्थितः॥ ४९॥ ततस्तेनतुभक्तेनशयनास्तरणःकृतः॥ विक्षेपस्थानशुध्यर्थंपंचगंगोदकंचतैः॥ ५०॥ इतस्ततस्तच्छिरसिबिंदवःपतितास्तदा॥ ज्ञानंतस्यसमुत्पन्नंबिंदुस्पर्शनमात्रतः॥ ५१॥ उवाचवचनंचारुकेभवंतःसमागताः॥ तोयमेतत्स्थितंकुत्रकिंवाज्ञानोदकंत्विदम्॥ ५२॥ मह्यंकिंचित्प्राशनार्थंदीयतांस्वल्पमेवहि॥ कृपालुनातेनदत्तंजलंपांचजलंशुभम्॥ ५३॥ तत्पीत्वाविमलाबुद्धिःक्षणादेवाभ्यजायत॥ पूर्वजन्मचसस्मारयमलोकागमंतथा॥ ५४॥ गत्वाभ्रातुःसच्चरणौधृत्वादीनंरुरोदह॥ आत्मनश्चगतिंप्रोक्त्वाउपायोस्यविधीयताम्॥ ५५॥ भ्रात्रासर्वेकार्पटिकाःपृष्टास्तेऊचुरादरात्॥ ॥कार्पटिकाऊचुः॥ ॥जा १६

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्तिकाशितीर्थानांमहिमानंसईश्वरः॥५६॥यज्जलस्पर्शमात्रेणपिशाचोभूत्ससात्विकः॥अस्मभ्यंदीयतेरा
ज्ञाएकोग्रामश्चवार्षिकम्॥५७॥स्वर्णमुद्राशतंकाशीजलाहरणहेतवे॥गम्यतांपंचदिवसैर्भवद्भिःकाशिका
पुरीम्॥५८॥तिष्ठंतिपंडितास्तत्रविचार्यागतिरुत्तमा॥एवंतद्वचनंश्रुत्वागृहीत्वासाधनंबहुः॥५९॥सकुटुं
बःकाशिकांसददर्शहरसेविताम्॥काशींप्रवेशकालेतुगणैरौद्रैर्निराकृतः॥६०॥तच्छरीरास्थिशाचोसौ
उवाचकरुणंवचः॥भ्रातर्गणामांरुंधंतिमामोद्वारोविधीयताम्॥६१॥इतिश्रुत्वावृचस्तस्यचित्रभानुः
समागतः॥काश्यांसकलवृत्तांतंपंडितेभ्योन्यवेदयत्॥६२॥तन्मोक्षणायचादिष्टोदेयआकाशदीपकः॥
आकाशदीपदानेनपिशाचोपिसमागतः॥६३॥वाराणस्यांननान्याःसपुत्रोभूद्गुणसंयुतः॥कृत्वासर्वेपिते
काशीवासंमोक्षमवाप्नुवन्॥६४॥नमःपितृभ्यःप्रेतेभ्योनमोधर्मायविष्णवे॥नमोयमायरुद्रायकांतार
पतयेनमः॥६५॥मंत्रेणानेनयेमर्त्याःपितृभ्यःस्वतुदीपकम्॥प्रयच्छंतिगतास्तेस्युर्नरकेयांतितेपिवै॥-
६६॥उत्तमांगतिमिच्छंतिदीपदानंमयेरितम्॥लक्ष्मीसंततिसिध्यर्थमारोग्यायप्रदीपयेत्॥६७॥आका
शेदीपदानंतुतथाश्रीविष्णुतुष्टये॥६८॥ ॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येदीपमहिमाक
थनंनामदशमोऽध्यायः॥ ॥कार्त्तिकस्यासितेपक्षेद्वादशीवत्ससंज्ञिता॥गोधूलिकालसंयुक्ताद्वाद
शीवत्सपूजने॥१॥वत्सपूजावटेचैवकर्त्तव्याप्रथमेहनि॥सवत्सांतुल्यवर्णांचशालिनींगांपयस्विनीम्॥
चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत्॥२॥ताम्रपात्रेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर॥गोक्षीरंगोघृतंचैव
दधिक्षीरंचवर्जयेत्॥३॥दिनांतेसूर्यबिंबार्धादुभयत्रघटीदलम्॥ततोनीराजनंकार्यंनिरीक्ष्येत्स्वशक्तमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुभम्॥ नानादीपान्प्रकल्प्यादौ स्वर्णपात्रादिसंस्थितान्॥४॥ नीराजयेद्दीपपूर्वं निरीक्षेत शुभाशुभम्॥ —
ज्ञापयित्वा सर्वदीपानुत्तराभिमुखान्न्यसेत्॥५॥ मुख्यादीपानव प्रोक्ता अन्यानपि च कल्पयेत्॥ ज्वाला चेद्द-
क्षिणासंस्था सतेजस्काशिखान्विता॥६॥ स्थिरा चेत्सौख्यदा प्रोक्ता विपरीता तु दुःखदा॥ कार्तिके कृष्णपक्षे
तु द्वादश्यादिषु पंचसु॥७॥ तिथिषूक्तः पूर्वरात्रे नृणां नीराजनो विधिः॥ पक्षं संसूचयेत्साद्यो द्वितीयो मास-
मेककम्॥८॥ तृतीये ऋतवः प्रोक्ताश्चतुर्थे त्वयनं तथा॥ वर्षं तु पंचमे दीपे शुभाशुभं विनिर्णयेत्॥९॥ सूर्यां-
शसंभवा दीपा अंधकारविनाशकाः॥ त्रिकाले मां दीपयंतु दिशंतु च शुभाशुभम्॥१०॥ अभिमंत्र्य च मंत्रे-
ण ततो नीराजयेत्क्रमात्॥ आदौ देवांस्ततो विप्रान्हस्तिनश्च तुरंगमान्॥११॥ ज्येष्ठान्श्रेष्ठानजघन्यांश्च-
मातृमुख्याश्च योषितः॥ ततो नीराजितान्दीपान्स्वस्वस्थानेषु विन्यसेत्॥१२॥ रुक्षे लक्ष्मीविनाशः स्या-
त्छ्वेतेरन्नक्षयो भवेत्॥ अतिरक्ते युद्धानि मृत्युः कृष्णशिखेषु च॥१३॥ एकांगी नाम गोपाला तयैतच्च
व्रतं कृतम्॥ धनधान्यसमायुक्ता जाता वर्षत्रयेण सा॥१४॥ ॥ऋषय ऊचुः॥ ॥का एकांगी कथं जाता-
धनधान्यसमन्विता॥ एतद्विस्तरतः श्रोतुं इच्छंत्येते तपोधनाः॥१५॥ ॥वालखिल्या ऊचुः॥ ॥आसी-
त्सुराष्ट्रे हृषीकेशः सचेलो धेनुपालकः॥ गवामष्टसहस्राणि तद्गृहे निवसंति च॥१६॥ वत्सादीनां न संख्या-
स्ति तथा लोकगवामपि॥ तस्यैका कन्यका जाता एकांगी नाम विश्रुता॥१७॥ नापुत्रस्य तु लोकोऽस्तीत्यादि-
वाक्यैः प्रपंचितः॥ पुत्रार्थं तु महायत्नं सचेलोऽसावथाकरोत्॥१८॥ गोदानानां सहस्रं तु नीलोत्सर्गशतं
तथा॥ कृतं सचेलकेनात्र ततः पुत्रोऽभ्यजायत॥१९॥ दुंदुभिर्नाम विख्यातस्तेषामासीत्सुरोहितः॥ अती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्रकुटिलोधूर्तोलोभिनांसशिरोमणिः॥२०॥लोभेच्छयातुतेनोक्तंमूलजातोहिबालकः॥अन्यन्नपृष्टंकिमपिकिंचि
द्दत्वाविदायितः॥२१॥आकारितापितृभ्यांतुएकांगीचंचलेक्षणा॥नयेमंबालकंशीघ्रंसुखेदत्वाघृतंमधु॥२२
क्षिपस्वतूर्णगंगायामस्माकंसुखवृद्धये॥एकांगीतंसमादाय दययाविष्टमानसा॥२३॥आस्थापयद्गह्वरेतंम
हावृक्षस्यकोटरे॥वारंवारंसमागत्यदिवसेषुनिशासुच॥२४॥तस्मैपयःपाययित्वापुनर्यातिस्वकंगृहम्॥
जातोसौवर्षमात्रेणकलभाषीसबालकः॥२५॥श्रुत्वाश्रुत्वावदेद्भाषांनानापक्षिचतुष्पदाम्॥एकांग्यपिचसं
जातायौवनाक्रांतदेहिका॥२६॥एकांगीदुंदुभिःप्राहएकांतेवचनंलघु॥मात्वंवरयभद्रंतेकुलपूज्योस्मितेन
घ॥२७॥स्वर्णाढ्यांतेकरिष्यामिनानावस्त्रोपशोभिताम्॥इतितद्वचनंश्रुत्वाएकांगीवाक्यमब्रवीत्॥२८॥-
धिङ्मूर्खकाणदुष्टात्मन्नहंत्वाभीरकन्यका॥ब्रह्मबीजसमुत्पन्नःकथंमांवरयिष्यसि॥२९॥ ॥दुंदुभिरुवाच
॥ ॥चतुर्वर्णाकन्यकापिविवाह्याब्राह्मणैःशुभे॥पितामहेनेदमुक्तंतस्माद्भार्याभवस्वनः॥३०॥ ॥एकांग्यु
वाच॥ ॥याचकंनवरिष्यामिनचकाणंकुरूपकम्॥सुशीलंचसुरूपंचभर्तारंवरयाम्यहम्॥३१॥नानाप्र
कारैःसाबालादुंदुभेनाथलोभिता॥नाभूद्यदातस्यवश्यातदाक्रोधंचकारसः॥३२॥अन्यास्येध्रियतांचे-
यंताडनीयामयातथा॥एकांतेवाघातनीयाछिद्रमन्वेषयाम्यहम्॥३३॥इत्थंविचार्यविप्रोसौतस्याःपश्य
तिकौतुकम्॥निलीयदिवसेविप्रोतयासार्द्धंगतोवने॥३४॥अपश्यद्दूरतश्चेष्टांतस्यादुष्टोहिजाधमः॥तया
निष्काशितोबालोदुग्धंदत्वायथेप्सितम्॥३५॥क्रीडयित्वाक्षणंतत्रपश्चात्संस्थापितःपुनः॥अकरोद्बग-
वारक्षांविप्रेणेत्थंविलोकितम्॥३६॥आगत्यासौगृहेशीघ्रंसचैलंवाक्यमब्रवीत्॥अहंसभिक्षुशाद्ययं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतोभागीरथीतटे ॥ ३७ ॥ एकांगीतत्रसंदृष्टाक्रीडंतीयवनैःसह ॥ यवनाद्बालकोजातःस्थापितःकोटरेसच ॥ ३८ ॥
अहोनष्टंतवकुलंनरकेषुपतिष्यति ॥ जात्यग्रेकथयिष्यामिनोचेत्तांत्यजदुर्मते ॥ ३९ ॥ तस्याःपुत्रंचतांचापि
बध्वापृष्ठेवृषस्यच ॥ वनमध्येत्यजक्षिप्रंबहिष्कारोन्यथाभवेत् ॥ ४० ॥ राज्ञाचदंडनीयस्त्वंजातिभिश्चबहि
ष्कृतः ॥ कन्यकारक्षणादेवनरकेपिपतिष्यसि ॥ ४१ ॥ सचैलस्त्रासितस्तेनजगामगहनंवनम् ॥ तावुभौवृष
पृष्ठेतुबध्वात्यक्त्वावनेतदा ॥ ४२ ॥ वृषोपितांसमादायगतोदैवस्ययोगतः ॥ हरिद्वारंतयासार्द्धंबंधःशिथि
लतांययौ ॥ ४३ ॥ बंधाद्विनिर्गतासातुबालकोपिविमोचितः ॥ वृषभस्तेनपाशेनबद्धोबालिकयातथा ॥ ४४
॥ जानातिवनमार्गान्सावृषेणादायशाद्वलम् ॥ कंदादिकंभक्षयित्वाकुटींतत्रचकारसा ॥ ४५ ॥ तृणान्यानी
यविक्रीतेतेनैनैववृषभेणसा ॥ पुष्णातितेनद्रव्येणभ्रातरंवृषभंतथा ॥ ४६ ॥ आगतेकार्त्तिकेमासिलोकाः
स्नानार्थमाययुः ॥ दानार्थंतुसमानीतास्तैर्गावोदेशदेशतः ॥ ४७ ॥ इमांगोपालिकांज्ञात्वारक्षणायददुश्चते ॥
अनयाभूयसीसेवाआरब्धातुगवांखग ॥ ४८ ॥ संदृश्यलोकास्त्वीयागाबह्वेनामभ्यनंदयन् ॥ इषासितहरेस्ति
थ्यांगोपूजावैष्णवैःकृता ॥ ४९ ॥ तांदृष्ट्वाबालिकासापिपूजांचक्रेयथाविधि ॥ अतिभक्त्याबालिकया चेत्थंवर्ष
त्रयंकृतम् ॥ ५० ॥ तस्यांदैववशात्तत्रसचैलेशःसमाययौ ॥ स्नानायकार्त्तिकेमासेगंगाद्वारेमुनीश्वराः ॥ ५१ ॥
दृष्ट्वावनेबालिकासावनकौतुकदर्शिना ॥ पृष्ट्वोदंतंततस्तस्याःपाणिग्रहमचीकरत् ॥ ५२ ॥ मदाज्ञयाहृषीकेशः
समागत्याथवेदितः ॥ दुंदुभिश्चधृतस्तत्रधृतस्तस्याःपिताअपि ॥ ५३ ॥ धिक्कृतोदुंदुभिस्तेनत्वयाशप्तोप्य
सौपुनः ॥ अद्यारभ्यनरालोकेकार्णेविश्वासकारकाः ॥ ५४ ॥ अवश्यंविलयंयांतिकार्तिकेनद्यापाम्यहम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्त्वार्पितस्तस्मैस चैलायसबालकः॥ ५५॥ गोव्रतंतुहृषीकेशस्योपदिष्टंतयारवग॥ पित्रोर्धनादिकंदत्वा
भर्त्रासार्द्धं जगामसा॥ ५६॥ तस्माद्गोपूजनंकार्यंद्वादश्यांकार्त्तिकस्यतु॥ एतद्गोव्रतमाहात्म्यंश्रुत्वाकुर्वंतियेनराः
॥ ५७॥ तेगोव्रतप्रभावेननगोभिर्विच्युताभुवि॥ गोपराधःकृतोयेन सव्रताद्विलयंव्रजेत्॥ ५८॥ ॥ इतिसनत्कुमा
रसंहितायांकार्त्तिकमाहात्म्येगोपूजाकथनंनामैकादशोध्यायः॥ ॥ वालखिल्याऊचुः॥ ॥ कृष्णपक्षेचतुर्दश्यां
मासिचाश्वयुजेतथा॥ दीपोत्सवसमीपेतुव्रतमेतत्समाचरेत्॥ १॥ प्रातःस्नात्वात्रयोदश्यांकृत्वावैदंतधावन
म्॥ त्रिरात्रनियमंकृत्वागोविंदेभक्तितत्परः॥ २॥ कार्यएतद्व्रतस्यांतेतथागोवर्धनोत्सवः॥ त्रिमुहूर्त्ताधिकायात्या
परवेधानदोषभाक्॥ ३॥ आश्विनस्यासितेपक्षेत्रयोदश्यानिशामुखे॥ यमदीपंवलिंदद्यादपमृत्युर्विनश्यति
॥ ४॥ एकदाधर्मराजेनदूताःसर्वेपिचैकतः॥ कृत्वाप्रोवाचवचनंसत्यंब्रूतममाग्रतः॥ ५॥ उच्चावचान्मारयतांभव
तांजायतेदया॥ क्वचिज्ज्ञाताथवानैवसत्यंब्रूतममाग्रतः॥ ६॥ ॥ दूताऊचुः॥ ॥ इंद्रप्रस्थेमहाराजोहंसोनामव
भूवह॥ एकदामृगयार्थंसगतःसैन्यसमावृतः॥ ७॥ तत्रापश्यन्मृगंचैकंमृग्यासहविनिर्गतम्॥ स्त्रीत्वात्त्यक्त्वामृगी
तेनहरिणार्थंकृतोद्यमः॥ ८॥ मृगोपिभूपतिंदृष्ट्वापलायनपरोभवत्॥ तत्पृष्ठेतुहयस्त्यक्तःस्वकीयस्तेनभूभुजा
॥ ९॥ अदृश्यतांक्वचिद्यातिदृश्योसौजायतेक्वचित्॥ देशाद्देशांतरंयातःचाराग्रेणप्रपीडितः॥ १०॥ आमध्यान्हं
गतस्तस्यपृष्ठेराजहयस्थितः॥ मृगःपलाय्यगतवान्राजापिश्रमसमूर्छितः॥ ११॥ घर्माक्रांतःपिपासार्त्तोनद-
दर्शजलंक्वचित्॥ वटच्छायांक्षणंसेव्यजलाधारंददर्शसः॥ १२॥ सैन्यंनदृष्टवान्मार्गेजलस्यापिनदृष्टवान्॥-
क्षुधयापीडितोप्यासीदश्वोपिश्रमपीडितः॥ १३॥ आडीशब्दंससुश्रावक्षुधितास्ताःप्रयांतिहि॥ प्रदृश्याश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यतच्छायांचलितस्तेनवर्त्मना॥१४॥क्रोशोपरिददर्शाग्रेकासारंपंकजान्वितम्॥हंसकारंडवाकीर्णंरथांगैश्चम-
नोहरम्॥१५॥नानापद्मैःपरिवृतस्फुरल्लतिमिचंचलम्॥नृपोदृष्ट्वातत्तडागंकृतकृत्यइवाभवत्॥१६॥स्वयंपीत्वा
जलंपश्चादश्वस्यापिनिवेदितम्॥ददर्शधीवरांस्तत्रनानामत्स्यापिहिंसकान्॥१७॥तानपृच्छन्महाराजोग्रामो
स्तिनिकटेक्कचित्॥ ॥मत्स्यघातकाऊचुः॥ ॥क्रोशादूर्ध्वंतुभगवान्ग्रामोस्तिनगरोपमः॥ १८॥ संवर्त्तोनामत
त्रत्यःसामंतकमहीपतिः॥स्वगृहद्वारिवासार्थंपांथिकानांतुमंडपः॥१९॥रचितोस्तिचगंतव्यंतयातत्रक्रस्वेच्छ
या॥स्नानपानादिकाध्वानांसौकर्यंतत्रवर्त्तते॥ २०॥ ॥राजोवाच॥ ॥इंद्रप्रस्थंस्थलादस्मात्कियद्दूरेव्यवस्थितम्
॥केनमार्गेणगंतव्यंप्रब्रूध्वंमत्स्यघातकाः॥२१॥ ॥धीवराऊचुः॥ ॥अस्मान्नैर्ऋत्यकोणेतुनवयोजनदूरतः॥
इंद्रप्रस्थपुरंरम्यंवर्ततेराजसेवक॥२२॥इतितद्वचनंश्रुत्वाअद्यगंतुंनपार्यते॥गृहप्रतीतिर्निश्चित्यग्राममध्यं
ययौनृपः॥ २३॥तेजोविशेषानुमितःकश्चित्प्रौढःपुमानयम्॥इतिज्ञात्वातुखट्वैकादत्तास्मैवेशनायच॥२४॥भक्ष्य
पात्रंसमानीताभजाश्चिपिटादधि॥ शीततोयंसमानीतंकिंचिद्भुक्तंनृपेणतत्॥२५॥रात्रौतत्रैवसंस्मृतो
जागर्त्तिचपुनःपुनः॥ग्रामेशजातपुत्रस्यषष्ठाहस्तद्दिनेभवत्॥२६॥ददर्शनृपतीरात्रौनारीयातिचतद्गृहम्
॥दीर्घात्यंतंरूपवतीलेखनीहस्तशालिनी॥२७॥तदंचलंगृहीत्वासःपर्यपृच्छतकासिच॥नोवाचवचनंसा
तुनृपेणाक्षेपितापुनः॥२८॥बलात्कारेणांचलंसागृहीत्वाम्यंतरेविशत्॥साहंकारोनृपोभूत्वास्थितवांस्तांप्र
तीक्षयन्॥२९॥पुनःसापिसमायातातूर्णमेववरानना॥बलात्कारेणनृपतिनाकरेधृत्वावचोब्रवीत्॥ ३०॥कात्वं
कंजपलाशाक्षिसत्यंब्रूहिममाग्रतः॥अन्यथात्वांहनिष्यामिरोचतेयत्तथाकुरु॥ ३१॥ ॥जीवंतिकोवाच॥ १९

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भाषितश्चमयालंस्याद्र्भवतास्क्ररक्षितः॥मुंचदूर्णनचेत्सांवैहनिष्यामिनसंशयः॥३२॥ ॥राजोवाच॥ ॥आज्ञात्वा
तवहत्तंतुनत्यक्ष्यामिकदाचन॥क्षत्रियःसन्नयदाभीतस्तदासनरकंव्रजेत्॥३३॥अवश्यमेवमर्त्तव्यंजीवितं-
नास्तिचस्थिरम्॥सर्वथाक्षत्रियेणैवनत्याज्याहंकृतिःक्वचित्॥३४॥समर्थस्त्वांहंतुमहंस्त्रीत्वाद्दादीन
हन्यते॥जिघांसंतंजिघांसीयादवध्यंप्राणसंशये॥३५॥इतितद्वचनंश्रुत्वाषष्ठीवचनमब्रवीत्॥त्वंस्वधर्म-
रतोयस्मात्तस्मात्तुष्टास्म्यहंनृप॥३६॥अहंजीवंतिकादेवीललाटेक्षरमालिकाम्॥जातकस्यलिखित्वाथ
स्वर्गयास्यामिसत्वरम्॥३७॥ ॥राजोवाच॥ ॥मातस्त्वयाकिंलिखितंतदिदानींनिगद्यताम्॥नमिथ्याले
खनंतेस्तितस्मात्संश्रृणुयाम्यहम्॥३८॥ ॥जीवंतिकोवाच॥ ॥विवाहस्यचतुर्थेन्हिसर्पसंसर्गदोषतः॥प्रा
क्कर्मतोस्यनिर्वाणंलिखितंतुमयानृप॥३९॥इत्युक्त्वासातदादेवीतत्रैवांतरधीयत॥अत्याश्चर्येनृपोमत्वावि
भ्रमत्रकरोम्यहम्॥४०॥निश्चित्येत्थसुषःकालेप्रस्थितोनृपतिःस्वयम्॥ततोमंत्रिणमाहूयवाक्यमेतदुवाचह
॥४१॥भांडारिकंधनंगत्वात्वरणंकुरुममाज्ञया॥यमुनायांदृढंगेहंसंधिछिद्रविवर्जितम्॥४२॥सर्पवैद्यास्तथैके
चिद्येमृत्युंजयजापकाः॥सर्वेषांमासिकंकृत्वास्थाप्यास्तेभ्यंतरेजनाः॥४३॥इतईशानदिग्भागेग्रामोस्तिन
गवाभिधः॥सामंतकोस्तितद्ग्रामेनाम्नाहेमनकोमहान्॥४४॥सकुटुंबःसमानेयःस्थाप्यतांसचमंदिरे॥
जातोयोबालकस्तस्यसतुपाल्यःप्रयत्नतः॥४५॥इतिराजवचःश्रुत्वाप्रेषितामहतीचमूः॥हेमनानयना-
र्थंतुमंत्रिणस्तांसमाविशन्॥४६॥ग्रामंसंवेष्ट्यसेनेशोहेमनंवाक्यमब्रवीत्॥हेमनःकंपसंयुक्तोवातेनकद
लीयथा॥४७॥आगतःपूर्वदिवसेकश्चिद्भूपस्यसेवकः॥पेशल्यंवाकृतंतेनयतःसेनासमागता॥४८॥ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पराधंमहीपस्यनजानेकिंभविष्यति॥ग्रामोवालुंठनीयोवावध्योवास्मिन्नृपाज्ञया॥४९॥इतिचिंतयमानंतंसेने
शोवाक्यमब्रवीत्॥भयंत्यक्त्वाशक्रचंसुंचनृपाज्ञांकुरुवेगतः॥५०॥कुटुंबंबालकंगृह्ययाहींद्रप्रस्थमादरात्॥तथै
वनगवेशेनगृहीत्वोपायनंबहु॥५१॥दर्शनंकृतवान्राज्ञस्तेनासौस्थापितोगृहे॥अपमृत्युविनाशाययानिदा
नानिभूतले॥५२॥कृतानिजपहोमाश्चसर्वेराज्ञात्वकारिताः॥दर्शनार्थंसमायातोबालकस्यतुभूपतिः॥५३॥
नानोपायैर्वर्धितोसौजातःषोडशवार्षिकः॥सुसंजयस्यकन्यैकासर्वलक्षणसंयुता॥५४॥दृष्ट्वाग्रहांश्चचि-
न्हानिकुलंशीलंसुरूपताम्॥दृष्ट्वास्वयंभूपतिनाबालकार्थंतुयाचिता॥५५॥हर्षीकृताःसर्वजनाविवाहश्चस्व
यंकृतः॥ततःश्चतुर्थेदिवसेप्राप्तेतुनृपतिःस्वयम्॥५६॥आत्मीयानेवसंगृह्यतस्यरक्षामचीकरत्॥जाय-
तेसर्वतश्चेष्टिरायुर्वृद्धिकारिका॥५७॥विनानिमेषंनृपतिस्तंपश्यतिचबालकम्॥वयंतत्रगताःस्वामि-
न्कालाज्ञावशतोयम॥५८॥तदादयासमुत्पन्नाकथमेषोहिवध्यतांमु॥अतिदुःखेनसंतप्तःप्रेतपत्यंत-
रोरगः॥५९॥नृपस्यनासिकामध्येनृपःशिंकामथाकरोत्॥तदानिर्गत्यसहसादंशितस्तेनबालकः॥६०
हाहाकारोमहानासीज्जीविताद्भ्रंशितःसखु॥तज्जन्मदिनमारभ्यत्वहिंसाव्रतकारिणः॥६१॥जातानृपाज्ञ
यालोकास्तद्वायुर्वृद्धिकारकाः॥दयातत्रसमुत्पन्नात्वस्माकंसूर्यसंभव॥६२॥यथानजीविताद्भ्रंश्येदी
दृशेतुमहोत्सवे॥तथोपायंब्रूहियमकृपांकृत्वास्मदग्रतः॥६३॥ ॥यमउवाच॥ ॥आश्विनस्यासितेप
क्षेत्रयोदश्यांनिशामुखे॥प्रतिवर्षंतुयोदद्याद्गृहद्वारेस्फदीपकम्॥६४॥मंत्रेणानेनभोदूताःसमानेयः २०
सनोत्सवे॥प्राप्तेपमृत्यावपिचशासनंक्रियताममम॥६५॥मृत्युनापाशदंडाभ्यांकालेनचमयासह॥त्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दद्यांदीपदानात्सूर्यजः प्रीयतामिति॥६६॥मंत्रेणानेनयोदीपंद्वारदेशेप्रयच्छति॥उत्सवेचापमृत्योश्चभयंतस्य
नजायते॥६७॥तस्मात्सुनिवराःसर्वेदीपंदद्युर्निशामुखे॥६७॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्ये
द्वादशोध्यायः॥ ॥वालखिल्याऊचुः॥ ॥पूर्वविद्धचतुर्दश्यामाश्विनस्यसितेतरे॥पक्षेप्रत्यूषसमयेस्ना
नंकुर्यात्प्रयत्नतः॥१॥अरुणोदयतोन्यत्ररिक्तायांस्नातियोनरः॥तस्याब्दिकभवोधर्मोनश्यत्येवनसंश
यः॥२॥तथाकृष्णचतुर्दश्यामाश्विनेर्कोदयेस्फुराः॥यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यते॥३॥
यदाचतुर्दशीनस्याद्विदिनेचेद्विधूदये॥दिनद्वयेभवेच्चापितदापूर्वैवगृह्यते॥४॥बलात्काराद्गृहाद्यापि-
शिष्टत्वान्नकरोतिचेत्॥तैलाभ्यंगंचतुर्दश्यांरौरवंनरकंव्रजेत्॥५॥तैलेलक्ष्मीर्जलेगंगादीपावल्याश्च
तुर्दशी॥अपामार्गमथोतुंबींप्रपुंनाटमथापरम्॥६॥भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै॥वारत्र
यंत्रिवारंचपठित्वामंत्रमुत्तमम्॥७॥सीतालोष्ठसमायुक्तंसकंटकदलान्वितम्॥हरपापमपामार्गभ्राम्य
माणःपुनःपुनः॥८॥इष्टबंधुजनैःसार्द्धमेतत्स्नानंसमाचरेत्॥स्नानांगतर्पणंकृत्वायमंसंतर्पयेत्ततः॥९
॥यमायधर्मराजायमृत्यवेचांतकायच॥वैवस्वतायकालायसर्वभूतक्षयायच॥१०॥औदुंबरायदध्ना
यनीलायपरमेष्ठिने॥वृकोदरायचित्रायचित्रगुप्तायतेनमः॥११॥चतुर्दश्यैतेमंत्राःस्युःप्रत्येकंचनमोन्वि
ताः॥एकैकेनतिलैर्मिश्रान्दद्यात्त्रीनुदकांजलीन्॥१२॥यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवा॥दे
वत्वंचपितृत्वंचयमस्यास्तिद्विरूपता॥१३॥जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोः॥नरकायप्रदातव्यो
दीपःसंपूज्यदेवताः॥१४॥अत्रैवलक्ष्मीकामस्यविधिःस्नानेमयोच्यते॥इषेभूतेचदर्शेचकार्त्तिकेप्रथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेदिने॥१५॥ यदास्वातीतदाभ्यंगस्नानंकुर्यादिधूदये॥ ऊर्ज्जेशक्लद्वितीयायांतिथौचस्वातियुग्मगे॥१६॥मा-
नवोमंगलस्नायीनैवलक्ष्म्यावियुज्यते॥ दीपैर्नीराजनादत्रसैषादीपावलिः स्मृता॥१७॥ इंदुक्षयेपिसंक्रांतौ-
रवौपातेदिनक्षये॥ अत्राभ्यंगेनदोषायप्रातःपापापनुत्तये॥१८॥ माषपत्रस्यशाकेनभुक्त्वातस्मिन्दिनेनरः
॥ प्रेताख्यायांचतुर्दश्यांसर्वपापैःप्रमुच्यते॥१९॥ इषासितचतुर्दश्यामिंदुक्षयतिथावपि॥ दर्शादौस्वातिसं-
युक्तेतदादीपावलिर्भवेत्॥२०॥ कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयम्॥ महाराजोबलिःप्रोक्तस्तुष्टेनह
रिणातथा॥२१॥ वरंयाचस्वभद्रंतेयद्यन्मनसिवर्त्तते॥ इतिविष्णुवचःश्रुत्वाबलिर्वचनमब्रवीत्॥२२॥आ
त्मार्थेकिंयाचनीयंसर्वंदत्तंमयातव॥ लोकार्थंयाचयिष्यामिशक्तश्चेद्देहितच्चमे॥२३॥ मयाद्यतेधरादत्ता —
वामनच्छद्मरूपिणे॥ त्रिभिःपदैस्त्रिदिवसैःसाचाक्रांतायतस्त्वया॥२४॥ तस्मादेतद्बलेराज्यमस्तुयत्त्वत्र
येहरे॥ मद्राज्येयेदीपदानंभुविकुर्वंतिमानवाः॥२५॥ तेषांगृहेतवस्त्रीयंसदातिष्ठतुसुस्थिरा॥ ममराज्ये
गृहेयेषामंधकारःपतिष्यति॥२६॥ लक्ष्मीसंतानांधकारःसदापततुतद्गृहे॥ चतुर्दश्यांचयेदीपान्नरका-
यददंतिच॥२७॥ तेषांपितृगणाःसर्वेनरकेनवसंतिच॥ बलिराज्यंसमासाद्ययैर्नदीपावलिःकृता॥२८॥
तेषांगृहेकथंदीपाःप्रज्वलिष्यंतिकेशव॥ बलिराज्येतुयेलोकाःशोकानुत्साहकारिणः॥२९॥ तेषांगृहे
सदाशोकःपततादितिनसंशयः॥ चतुर्दश्यात्रयेराज्यंबलेरस्त्वितियाचयेत्॥३०॥ पुरावामनरूपेणप्रार्थ
यित्वाधरामिमाम्॥ ददावतिथयेंद्रायबलिंपातालवासिनम्॥३१॥ कृत्वादैत्यपतेरित्थंहरिणातद्दिनत्र
यम्॥ तस्मान्महोत्सवश्चात्रसर्वथैवहिकारयेत्॥३२॥ महारात्रिःसमुत्पन्नाचतुर्दश्यांमुनीश्वराः॥अ

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्तदुत्सवः कार्यः शक्तिपूजापरायणैः ॥ ३३॥ बलिराज्यं समासाद्य यक्षगंधर्वकिन्नराः॥ ओषध्यश्चापि शाचाश्च मं-
त्राश्च मणयस्तथा॥ ३४॥ सर्व एव प्रहृष्यंति नृत्यंति च निशासु खे॥ तत्तन्मंत्राश्च सिध्यंति बलिराज्येन संशयः ॥ ३५॥
बलिराज्यं समासाद्य यथा लोकाः स्म हर्षिताः ॥ तथा तद्दिनमध्ये तु लोकाः स्युर्हर्षिता भृशम्॥ ३६॥ तुलासंस्थे-
सहस्रांशौ प्रदोषे भूतदर्शयोः ॥ उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनम्॥ ३७॥ नरकस्थास्तु ये प्रेता-
स्तेषां मार्गे व्रतात्सदा॥ पश्यंत्येव न संदेहः कार्यो ऽत्र मुनिपुंगवैः॥ ३८॥ आश्विने मासि भूतादि तिथयः कीर्त्ति
तास्त्रयः॥ दीपदानादिकार्येषु ग्राह्याम ध्यान्हकालिकाः॥ ३९॥ यदि स्युः संगवादर्वागेताश्च तिथयस्त्रयः॥
दीपदानादिकार्येषु कर्त्तव्याः पूर्वसंयुताः॥ ४०॥ इति सनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये त्रयोदशोऽध्या
यः॥ ॥ वालखिल्या ऊचुः॥ ॥ एवं प्रभातसमये त्वमायां तु मुनीश्वराः॥ स्नात्वा देवान्पितॄन्भ-
क्त्या संपूज्याथ प्रणम्य च॥ १॥ कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः॥ दिवा तत्र न भोक्तव्यमृते बालातु
रज्जनात्॥ २॥ ततः प्रदोषसमये पूजयेदिंदिरां शुभां ॥ कुर्यान्नानाविधैर्वस्त्रैः स्वच्छं लक्ष्म्याश्च मंडपम्
॥ ३॥ नानापुष्पैः पल्लवैश्च चित्रैश्चापि विचित्रितम्॥ तत्र संपूजयेल्लक्ष्मीं देवांश्चापि प्रपूजयेत् ॥ ४॥ सं-
पूज्या देवनार्योऽपि बहुभिश्चोपचारकैः॥ पादसंवाहनं कुर्याल्लक्ष्म्यादीनां तु भक्तितः॥ ५॥ अस्मिन्न-
हनि सर्वेऽपि विष्णुना मोचिताः पुरा॥ बलिकारागृहाद्देवा लक्ष्मीश्चापि विमोचिता॥ ६॥ लक्ष्म्या सार्द्धं
ततो देवा जग्मुः क्षीरोदधौ पुनः॥ प्रसुप्ता बहुकालं ते सुखं तस्मान्मुनीश्वराः॥ ७॥ रचनीयाः सूत्रग
र्भाः पर्यंकाश्च सुतूलिकाः॥ दुग्धफेनोपमैर्वस्त्रै रास्तृताश्च यथादिशम्॥ ८॥ स्थापयेत्तान्सुराल्ल-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰मा॰ क्ष्मीर्वेदघोषसमन्वितः॥ लक्ष्मीर्दैत्यभयान्मुक्तासुखंसुप्तांबुजोदरे॥ ९॥ अतोत्रविधिवत्कार्यातुष्टैतुसुखसु-
२२ प्तिका॥ तदन्हिपद्मशय्यायांयःपद्मासौख्यविवृद्धये॥ १०॥ कुर्यात्तस्यगृहंमुक्त्वातत्सद्माक्वापिनव्रजेत्॥ नकुर्वं-
तिनराइत्थंलक्ष्म्यायेसुखसुप्तिकाम्॥ ११॥ धनचिंताविहीनास्तिकथंरात्रौस्वपंतिहि॥ तस्मात्सर्वप्रयत्नेन-
लक्ष्मीसंपूजयेन्नरः॥ १२॥ सतुदारिद्र्यनिर्मुक्तःस्वजातौस्यात्प्रतिष्ठितः॥ जातीपत्रलवंगैलात्वक्कर्पूरस-
मन्वितम्॥ १३॥ पाचयित्वागव्यदुग्धंसितांदत्वायथोचिताम्॥ लड्डुकांस्तस्यकुर्वीततांश्चलक्ष्मींसमर्प-
येत्॥ १४॥ अन्यच्चतुर्विधंभक्ष्यंदेशकालादिसंभवम्॥ सर्वंन्निवेदयेल्लक्ष्म्यैममश्रीःप्रीयतामिति॥ १५
॥ दीपदानंततःकुर्यात्प्रदोषेचतथोल्मुकम्॥ भ्रामयेत्तस्यशिरसिसर्वारिष्टनिवारणम्॥ १६॥ दीपवृ-
क्षास्तथाकार्याःशक्त्यादेवगृहादिषु॥ चतुष्पथेस्मशानेचनदीपर्वतवेश्मसु॥ १७॥ वृक्षमूलेषुगोष्ठेषु
चत्वरेषुगृहेषुच॥ वस्त्रैःपुष्पैःशोभितव्याराजमार्गस्यभूमयः॥ १८॥ गृहेषुस्थापयेन्नानापक्वान्ना-
निफलानिच॥ नागवल्लीदलादीनिरचयित्वाचनिक्षिपेत्॥ १९॥ शोभांकुर्याद्राजमार्गेकमलैश्चवि-
शेषतः॥ तदभावेंबशादीनांकृत्वातानिचशोभयेत्॥ २०॥ एवंपुरमलंकृत्यप्रदोषेतदनंतरम्॥ ब्रा-
ह्मणान्भोजयित्वादौसंभोज्यचबुभुक्षितान्॥ २१॥ लड्डुकापूपमंडाद्याःशष्कुलीपूरिकादिकाः॥ अ-
लंकृतेनभोक्तव्यंनववस्त्रोपशोभिना॥ २२॥ ततोपरार्द्धसमयेघोषयेन्नगरंनृपः॥ आद्यराज्यंब-
लेर्लोकायथेच्छंक्रीड्यतामिति॥ २३॥ यथेच्छंक्रीड्यतांबालाइत्याज्ञाप्यनृपेणतु॥ विलोक्यबालक्री- २२
डांतांनानासामग्रिसंयुताम्॥ २४॥ तेभ्योदद्यात्क्रीडनकंततःपश्येच्छुभाशुभम्॥ तैश्चेत्प्रदीपितोवन्हिर्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वालांमुंचतयदा॥ २५॥ महामारीभयंघोरंदुर्भिक्ष्यंचाथजायते॥ बालरुष्टेराजशोकस्तेषांतुष्टेनृपेसु-
खम्॥ २६॥ बालयुद्धेराजयुद्धंरोदनेबालकैःकृते॥ अवश्यमेवभवतिवर्षाद्राज्यविनाशनम्॥ २७॥ य-
ष्टिकादिकृतानश्वान्यदारोहंतिबालकाः॥ तदाराज्ञोजयोवाच्यःपरराष्ट्रविमर्दनम्॥ २८॥ यदाक्रीडंति
बालाश्चेल्लिंगंधृत्वाकरादिषु॥ तदाप्रसिद्धंनारीणांव्यभिचारःप्रजायते॥ २९॥ अन्नंयदागोपयंतिक्री
डनेबालकाजलम्॥ दुर्भिक्ष्यंदृष्ट्यभावश्चशीघ्रमेवप्रजायते॥ ३०॥ एवंबालकृतांचेष्टांबुध्वाचोत्पफ
लंवदेत्॥ लोकाश्चापिपुरेरम्येसुधाधवलिताजिरे॥ ३१॥ गीतवादित्रसंजुष्टेप्रज्वालितसुदीपके॥-
अन्योन्यप्रीतिसंयुक्तेदत्तलालनकेजने॥ ३२॥ तांबूलहृष्टहृदयेकुंकुमक्षोदचर्चिते॥ दुकूलपट्टव-
सनेपथ्यस्वर्णविभूषणे॥ ३३॥ मित्रस्वजनसंबंधीस्वगोत्रज्ञातिपूजिते॥ बलिराज्येप्रकर्त्तव्यंयद्य
न्मनसिवर्त्तते॥ ३४॥ जीवहिंसासुरापानंस्तेयंमार्दसमागमः॥ हित्वातदन्यत्कर्त्तव्यंबलिराज्ये-
नदोषभाक्॥ ३५॥ आत्मनोयच्चसौख्यार्थेपरदुःखाकरंकृतम्॥ वारांगनादिगमनंस्पृष्टास्पृष्टादि
भक्षणम्॥ ३६॥ अन्यांबरधृतिश्चापिद्यूताद्यंचनदुष्यति॥ एवंतुसर्वदाकार्योबलिराज्यमहोत्सवः
॥ ३७॥ जीवहिंसासुरापानमगम्यागमनंतथा॥ चौर्यंविश्वासघातश्चपंचैतानिमुनीश्वराः॥ ३८॥ ब-
लिराज्येतुनरकद्वाण्युक्तानिसंत्यजेत्॥ ततोर्धरात्रसमयेस्वयंराजाब्रजेत्पुरम्॥ ३९॥ अवलोकयितुंर
म्यंपद्भ्यामेवशनैःशनैः॥ महतातूर्यघोषेणज्वलद्भिर्हस्तदीपकैः॥ ४०॥ हर्म्यशोभाकृतंयावत्तत्कृतकैरश्व
कैर्नरैः॥ बलिराज्यप्रमोदंचदृष्ट्वास्वगृहमाव्रजेत्॥ ४१॥ एवंगतेनिशीथेचजनेनिद्रार्द्धलोचने॥ तावन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गरनारीभिः शूर्पडिंडिमवादनैः॥ ५२॥ निष्कासयेत्ततो हृष्टाभिरलक्ष्मीः स्वगृहांगणात्॥ दंडैकरजनीयोगे दर्शः
स्यात्तु परेहनि॥ ५३॥ तदा विहाय पूर्वेद्युः परेह्नि सुखरात्रिका॥ ये वैष्णवा वैष्णवाश्च बलिराज्योत्सवं न
राः॥ ५४॥ न कुर्वंति वृथा स्तेषां धर्माः स्युर्नात्र संशयः॥ ५५॥ इति सनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये
चतुर्दशोऽध्यायः॥ ॥ वालखिल्या ऊचुः॥ ॥ प्रतिपद्युभयेभ्यंगं कृत्वा नीराजनं ततः॥ सुवेषः सत्कथा
गीतैर्दानैश्च दिवसं नयेत्॥ १॥ शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरम्॥ कार्त्तिके शुक्लपक्षे तु प्रथमेहनि
सत्यवत्॥ २॥ प्रत्युवाच वचश्चेदं देवीं प्रति सदाशिवः॥ कालक्षेपाय केषांचित्केषांचिद्धनहेतवे॥ ३॥ के
षांचिद्धननाशाय पश्य द्यूतं कृतं मया॥ तस्य त्वं कौतुकं पश्य भुवनं लापयाम्यहम्॥ ४॥ उक्त्वेत्थं क्रीडितं
ताभ्यां भवान्या च जितं तदा॥ पुनर्द्वितीयं भुवनं लापितं निर्जितं तया॥ ५॥ पुनस्तृतीयं भुवनं लापितं
निर्जितं तया॥ पुनर्वृषश्च सर्पः पुनः पुनः पंनगबंधनम्॥ ६॥ शशिलेखाडमरूकमर्द्धांगं चाप्यजीजयत्॥
निर्गतस्तु हरो गेहाच्चीरवल्कलधारकः॥ ७॥ गंगातीरे समागत्य तस्थौ चिंतासमन्वितः॥ तस्मिन्क्षणे
कार्त्तिकेयः खेलितुं च गतः क्वचित्॥ ८॥ गंगातीराद्ययौ गेहमपश्यत्स पितृशंकरम्॥ ईषत्क्रोधं विरक्तं च
ननाम चरणौ पितुः॥ ९॥ तेनापि मूर्ध्नि चाघ्रातः पुत्र याहि गृहे सुखम्॥ तव मात्रा जितश्चाहं गच्छामि
गहनं वनम्॥ १०॥ ॥स्कंद उवाच॥ ॥ कथं मात्रा जितो देवो वनं कस्माच्च गच्छति॥ अहमप्यागमि
ष्यामि त्वत्सादौ सेवयाम्यहम्॥ ११॥ ॥शिव उवाच॥ ॥ विजित्य तव मात्रा तु क्षणं न स्थेयमत्र तु॥ म २३
म लोके तथेत्युक्त्वा क्वचिद्गच्छाम्यहं ततः॥ १२॥ ॥स्कंद उवाच॥ ॥ मा गच्छ त्वं महादेव द्यूतमार्गः प्रह-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र्यताम्॥ आनीयंतेमयाजित्वातवसर्वंधनादिकम्॥ १३॥ शिवेनाथ तथेत्युक्त्वा द्यूतमार्गः प्रदर्शितः॥ स्कंदोपिगृ
हमागत्यपार्वतींवाक्यमब्रवीत्॥ १४॥ ॥स्कंदउवाच॥ ॥देविदेवोगतः क्वासौवृषभोत्रैवसंस्थितः॥ तवकेच-
विधुःकस्मान्मातःसत्यंवदस्वनः॥ १५॥ ॥देव्युवाच॥ ॥स्वयमेवत्कृतंद्यूतंस्वयमेवापराजितः॥ स्वयमेवग
तःक्रोधात्साध्यते समयाकथम्॥ १६॥ ॥स्कंदउवाच॥ ॥मयासहक्रीडितव्यंकथंतत्क्रीडनंत्विति॥ देव्यु
क्रीडत्तेनसार्द्धं ततःस्कंदेननिर्जितम्॥ १७॥ मयूरेणवृषस्तस्याः शक्त्यापन्नगबंधनम्॥ वृषेणेंदुस्ततोधांगं
स्वंसर्वस्वेननिर्जितम्॥ १८॥ कौपीनेनार्जितंचर्मगृहीत्वातदुपाययौ॥ गंगातीरेयत्रशिवस्तत्रागत्यन्यवेद
यत्॥ १९॥ ततोदेवीसमीपेतुविघ्नराजःसमाययौ॥ किमर्थंम्लानवदनादेवीजातासितद्वद॥ २०॥ ॥देव्यु-
वाच॥ ॥मयाजितोमहादेवः सतुगेहाद्विनिर्गतः॥ आयास्यतिवृषाद्यर्थंमितिनिश्चित्यसंस्थितम्॥ २१॥
तवभ्रातातुतज्जित्वासर्वमस्मैनिवेदितम्॥ नायास्यत्यधुनादेवइतिचिंतापरास्म्यहम्॥ २२॥ ॥गणेश
उवाच॥ ॥देविशिक्षयमेद्यूतंजेष्यामिभ्रातरंह रम्॥ आनयिष्यामिसामग्रींयद्यहंस्यांसुतस्तव॥ २३॥
इतिपुत्रवचःश्रुत्वातस्मैद्यूतमशिक्षयत्॥ सगृहीत्वापाशयुग्मंसारिकाश्शीघ्रमाययौ॥ २४॥ पृष्ट्वापृष्ट्वायत्रदेवः
स्कंदोयत्रव्यवस्थितः॥ ॥गणेशउवाच॥ ॥मयानीताविमौपाशौसारिकानाद्यमेवच॥ २५॥ संक्रीडितुंम
यासार्द्धंदेवस्याग्रेममाग्रज॥ इतिभ्रातुर्वचःश्रुत्वाउभाभ्यांक्रीडितंतदा॥ २६॥ मूषकेणबलीवर्दोमयूरश्चा
प्यजीजयत्॥ शिवस्यसर्वविषयंस्कंदस्यचतथैवच॥ २७॥ गृहीत्वासतुविघ्नेशस्तत्कालंपार्वतींययौ॥ पा
र्वत्यपिचसंतुष्टागणेशंवाक्यमब्रवीत्॥ २८॥ ॥पार्वत्युवाच॥ ॥सम्यक्कृतंत्वयाभद्रनानीतोसौमहेश्वरः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामदानादिकंकृत्वाआनयात्रमहेश्वरम्॥ २९॥ तथेत्युक्त्वागणेशोसौसमारुह्यचमूषकम्॥ अतित्वरितआ-
यातोगृहंनेतुंमहेश्वरम्॥ ३०॥ ईश्वरस्तनउत्थायहरिद्वारंसमागतः॥ अन्तरेदेरितवृत्तांतोविष्णुस्तत्रसमाग
तः॥ ३१॥ ॥विष्णुरुवाच॥ ॥त्र्यक्षांविद्यांकुरुशिवएकाक्षोहंभवाम्यहम्॥ रावणेनतथेत्युक्तंकाणोभव
जनार्दन॥ ३२॥ ॥विष्णुरुवाच॥ ॥ओतुर्वत्सत्वयसेमांत्वंतस्मादोतुर्भविष्यसि॥ ॥नारदउवाच॥ ॥देव
सिद्धंमहाकार्यमायातिसगणेश्वरः॥ ३३॥ भवद्वृत्तांतंज्ञातुंचमूषकस्तस्यधर्ष्यताम्॥ इतिश्रुत्वानारदस्य-
वचनंरावणोगतः॥ ३४॥ कुर्वन्मार्जारवच्छब्दंमूषकोसौपलायितः॥ मूषकंत्यज्यगणपःशनैःशनैरुपाय
यौ॥ ३५॥ जातोविष्णुःपात्राइतिदूरतस्तेनलोकितम्॥ प्रणिपत्यमहादेवंविनम्रनतकंधरः॥ ३६॥ ॥ग
णेशउवाच॥ ॥आगम्यतांदेवगेहेदेवीमानपुरःसरम्॥ यदिनायासिगेहेत्वंप्राणांस्त्यजतिचांबिका॥ ३७
॥त्वय्यागतेमयासर्वकार्यमेतदुपायनम्॥ ॥शिवउवाच॥ ॥एषात्र्यक्षामयाविद्याधुनागणपनिर्मिता
॥ ३८॥ अनयाक्रीडतेदेवीआगमिष्येगृहंतदा॥ ॥गणेशउवाच॥ ॥सर्वथैवक्रीडितव्यंदेव्यानास्त्यत्रसंशयः
॥ ३९॥ आगम्यतांगृहेदेवभक्त रायाहिमाव्रज॥ इतितस्यवचःश्रुत्वाईश्वरःसगणोययौ॥ ४०॥ नारदोपिगत
स्तत्रमहोत्सुरपिचागतः॥ उपविष्टास्तेकैलासेदेवीतत्रसमागता॥ ४१॥ दृष्ट्वादेवींप्रणम्यादौमहेशोवाक्यमब्रवी
त्॥ त्र्यक्षाविद्यामयादेविगंगाद्वारेविनिर्मिता॥ ४२॥ अनयाजयसेत्वंचेत्तदात्वंसत्यभाषिणी॥ ॥देव्युवा-
च॥ ॥द्यूषाद्यातवसामग्रीमयेयंपालिताशिव॥ ४३॥ त्वयाकिंलाप्यनेदेवदर्शयस्वममाग्रतः॥ इतिश्रुत्वाव
चस्तस्याःप्रेक्षताधोमुखंहरः॥ ४४॥ तस्मिन्क्षणेनारदेनस्वकौपीनंसमर्पितम्॥ वीणादंडश्चोपवीतमनेनक्रीड्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामिति॥४५॥ सदाशिवः प्रसन्नोभूत्क्रीडनंसहचक्रतुः॥ यद्यद्याचयतेरुद्रस्तथाविष्णुः प्रजायते॥४६॥यद्य-
द्याचयतेदेवीविपरीतस्तदापतत्॥स्वकीयाभरणाद्यंचमहादेवेननिर्जितम्॥४७॥स्कंदालंकारिकंसर्वंपुन
रात्तंहरेणच॥ततोगणेशः प्रोवाचवाक्यंसदसिचागतः॥४८॥ नक्रीडितव्यंहेमातः पाशोलक्ष्मीपतिःस्वयम्॥
कृतोहरेणसर्वस्वंतेहरिष्यतिमास्पिता॥४९॥इतिपुत्रवचः श्रुत्वापार्वतीक्रोधसंयुता॥तथाविधांतामालोक्य-
रावणोवाक्यमब्रवीत्॥५०॥ ॥रावणउवाच॥ ॥पापिष्ठेनाद्यशप्तोस्मिदुर्बुद्धेनविष्णुना॥अधर्मोयंनकर्त्त-
व्यइत्युक्तंचमयाततः॥५१॥ ॥देव्युवाच॥ ॥सर्वान्क्षिपिष्येवत्साहंधूर्त्तानेतान्महाबलान्॥सामर्थ्येपश्यमेपु
त्रधर्मत्यागफलंतथा॥५२॥देवयस्माद्बलयाकपटंचकृतंत्वया॥तस्मात्सदास्कृतेमूर्धबलाभारप्रपीडितः॥
५३॥यतःस्ततःकुचेष्टात्वंयतःशिक्षयसेसुने॥स्वप्नेचापिसुखंस्त्रीणांनकदाचिद्भविष्यति॥५४॥यतःकृता
चाबलयासहमायात्वयाहरे॥एषोवैरीरावणोयंतवभार्यांनयिष्यति॥५५॥हित्वामांमातरंपुत्रबालक
त्वंत्वयाकृतम्॥अतस्त्वंनयुवावृद्धोबालएवभविष्यसि॥५६॥ ॥गणेशउवाच॥ ॥अनेनचोतुरूपेण
मूषकोयंपलायितः॥मध्येमार्गंकृतोविघ्नःशपैनंराक्षसाधमम्॥५७॥ ॥देव्युवाच॥ ॥यस्माद्विघ्नः
कृतोदुष्टत्वयामेबालकस्यतु॥तस्मादयंतववरिपुर्विष्णुस्त्वांघातयिष्यति॥५८॥इतिदेव्यावचः श्रुत्वासर्वेस
क्रुद्धमानसाः॥देवीशापेमनश्चक्रुर्नारदोवाक्यमब्रवीत्॥५९॥कोपंकुर्वंतुमादेवानेयंशप्याकदाचन॥
सर्वेषामादिमायेयंयथायोग्यफलप्रदा॥६०॥नायंशापअसावाशीःस्मर्त्तव्यासुविचक्षणैः॥गंगासदा
तिष्ठतुरुद्रमस्तकेबलाद्भ्रमंवैनयतुक्षपाचरः॥६१॥जायाहरस्यापियथोचितामृतिश्चानंगतृष्णारहि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तःकुमारः॥६२॥अहंत्वमाभिधरणीनस्थातव्यंकदाचन॥सम्यप्रोक्तंत्वयादेविश्रृणिवदानींवचोमम॥६३॥स
र्वेक्रोधापन्नुत्सर्थेननर्तमुनिपुंगवः॥कक्षादानंचकारोच्चैर्हाहाहाहीतिचाब्रवीत्॥६४॥तस्यचेष्टांविलोक्या
थसर्वेहर्षमवाप्नुयुः॥ ॥देव्युवाच॥ ॥भोभोविदूषकश्रेष्ठकृतकृत्योसिनारद॥६५॥वरंवरयभद्रंतेयत्तेम
नसिवर्त्तते॥ ॥नारदउवाच॥ ॥याचयंतुवरंसर्वेकिंवाकिंयाचयिष्याथ॥६६॥सर्वतेयाचयिष्यामियथा
श्रेष्ठंब्रुवंतुतान्॥॥शिवउवाच॥ ॥सर्वसंक्षम्यतांदेविजितंयद्वृषभादिकम्॥६७॥तन्ममास्तुद्यूतवार्तैर्न-
ग्राह्यंजगदंबिके॥ ॥देव्युवाच॥ ॥मास्तुत्वयासमंनाथस्वप्नेपिममचांतरम्॥६८॥एतदेवपरंमन्येमाभू-
त्क्रोधोममोपरि॥कार्त्तिकेशुक्लपक्षेतुप्रथमेहनिसत्यवत्॥६९॥जयोऽब्धोमयात्वत्तःसत्येनैवमहेश्वर॥
तस्माद्यूतंप्रकर्त्तव्यंप्रभातेत्रैवमानवैः॥७०॥तस्माद्यूतेजयोयस्यतस्यसंवत्सरंजयः॥ ॥विष्णुरुवाच॥ ॥
७१॥अहंयंत्करिष्यामिश्रेष्ठंबालघुमेवच॥तथातथासभवतुवरमेनंवदाम्यहम्॥७२॥ ॥स्कंदउवाच॥
सदामनस्तपस्यायांममतिष्ठतुदेवताः॥कदापिविषयेमास्तुदेयएषोवरोमम॥७३॥ ॥गणेशउवाच॥संसारेयानिका
र्याणितदादौममपूजनात्॥यांतुसिद्धिंममकृपांविनासिध्यंतुमाक्वचित्॥७४॥ ॥रावणउवाच॥ ॥वेदव्याख्यानसाम-
र्थ्यममशीघ्रंभवत्विति॥सदाशिवेसदाचास्तुभक्तिर्मेव्यभिचारिणी॥७५॥ ॥नारदउवाच॥ ॥कुद्याकुद्याश्चयेके-
चिन्मूर्खामूर्खाश्चयेजनाः॥मद्वाक्यंसत्यमित्येवमानयंतुसदासुराः॥७६॥इत्युक्त्वांतर्हिताःसर्वेदेवारुद्रपुरोगमाः
॥तस्मात्प्रतिपदीद्यूतंकुर्यात्सर्वोपिवैजनः॥७७॥द्यूतंनिषिद्धंसर्वत्रहित्वाप्रतिपदंबुधाः॥स्वस्योद्यमादिज्ञानायकु
र्याद्यूतमतंद्रितः॥७८॥विशेषवच्चभोक्तव्यंप्रशस्तैर्ब्राह्मणैःसह॥दयिताभिश्चसहितैर्नेयासाऽचनिशाभवेत्॥७९॥ २५

॥ततः संपूजयेन्माने रंतःपुरनिवासिनीः॥ पदातिजनसंघातान्ग्रैवेयैः कटकैः शुभैः॥ ८०॥ स्वनामकैः स्वयं राजा तो
षयेत्स्वजनान्पृथक्॥ वृषभान्महिषांश्चैव युध्यमानान्परैः सह॥ ८१॥ गजानश्वांश्च योधांश्च पदातीन्समलं
कृतान्॥ मंचारूढः स्वयं पश्येन्न टनर्तकचारणान्॥ ८२॥ योधयेच्चासयेच्चैव गोमहिष्यादिकं तथा॥ ततोप
राह्णसमये पूर्वस्यां दिशि कारयेत्॥ ८३॥ मार्गपालीं प्रबध्नीयात्तुंगे स्तंभेथ पादपे॥ कुशकाशमयीं दिव्यां लंबकै
र्बहुभिर्नृपः॥ ८४॥ दर्शयित्वा गजानश्वान्सायमस्यास्तलं नयेत्॥ कृतहोमैर्द्विजैः सम्यग्बध्नीयान्मार्गपा-
लिकाम्॥ ८५॥ मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे॥ मार्गपालीं समुल्लंघ्य नीरुजः स्युः सुखान्विताः॥
८६॥ तस्मादेतत्प्रकर्त्तव्यं द्यूताद्यं विधिपूर्वकम्॥ ८७॥ इति सनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये द्यूतविधि
र्नाम पंचदशोऽध्यायः॥ ॥पूर्वविद्धा प्रकर्त्तव्या प्रतिपद्बलिपूजने॥ वर्धमानतिथिर्नंदा यदा सार्द्धत्रिया
मिका॥ १॥ द्वितीयादृष्टिगामित्वादुत्तरा तत्र चोच्यते॥ बलिमालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः॥ २॥ गृह-
स्य मध्यशालायां विंध्यावल्या सहान्वितम्॥ जिह्वाताल्वक्षिणी प्रांते करयोः पादयोस्तले॥ ३॥ रक्तवर्णे-
नास्य केशाः कृष्णेनैव समालिखेत्॥ सर्वांगं पीतवर्णेन वास्त्राद्यं नीलवर्णतः॥ ४॥ वस्त्राद्यं श्वेतवर्णेन यथा
शोभं प्रकल्पयेत्॥ सर्वाभरणशोभाढ्यं द्विभुजं नृपचिन्हितम्॥ ५॥ लोको लिखेद्गृहस्यांतः शय्यायां शु
क्लतंदुलैः॥ मंत्रेणानेन संपूज्य षोडशैरुपचारकैः॥ ६॥ बलिराज नमस्तुभ्यं दैत्यदानवपूजित॥ इंद्रश-
त्रोमरारातिविष्णुसांनिध्यदो भव॥ ७॥ बलिमुद्दिश्य दीयंते दानानि मुनिपुंगवाः॥ यानि तान्यक्षयाणि
स्युर्मयैतत्संप्रदर्शितम्॥ ८॥ कौमुदीति करं यस्माद्दीयंते स्यां युधिष्ठिर॥ पार्थिवेंद्रैर्मुनिवरास्तेनेयं कौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुदीस्मृता॥९॥योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर॥हर्षदैन्यादिरूपेणवर्षंतस्यप्रयातिहि॥१०॥बलिपूजां
विधायैवंपश्चाद्गोक्रीडनंचरेत्॥गवांक्रीडादिनेयत्ररात्रौदृश्येतचंद्रमाः॥११॥सोमोराजापशून्हंतिसुरभीपू
जकांस्तथा॥प्रतिपद्दर्शसंयोगेक्रीडनंतुगवांमतम्॥१२॥परविद्धासुयःकुर्यात्पुत्रदारधनक्षयः॥अलं
कार्यास्तदागावोगोग्रासादिभिरर्चिताः॥१३॥गीतवादित्रनिर्घोषैर्नयेन्नगरबाह्यतः॥आनीयचततःपश्चा
त्कुर्यान्नीराजनाविधिम्॥१४॥अथचेत्प्रतिपत्स्वल्पानारीनीराजनंचरेत्॥द्वितीयायांततःकुर्यात्सायंमंग
लमालिकाः॥१५॥एवंनीराजनंकृत्वासर्वपापैःप्रमुच्यते॥प्रतिपत्पूर्वविद्धैवयष्टिकाकर्षणेभवेत्॥१६॥कुः
त्राकाशमयींकुर्याद्यष्टिकांसुदृढांनवाम्॥देवद्वारेनृपद्वारेथवानेयाचतुष्पथे॥१७॥तामेकतोराजपुत्राहीनव
र्णास्तथैकतः॥गृहीत्वाकर्षयेयुस्तेयथासारंमुहुर्मुहुः॥१८॥समसंख्याद्वयोःकार्याःसर्वेपिबलवत्तराः॥जयो
त्रहीनजातीनांजयोराज्ञस्तुवत्सरम्॥१९॥उभयोःपृष्ठतःकार्यारेखासाकर्षकोपरि॥रेखांतेयोनयेत्तस्यजयो
भवतिनान्यथा॥२०॥जयचिन्हमिदंराजाविदधीतप्रयत्नतः॥२१॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहा
त्म्येषोडशोऽध्यायः॥ ॥वालखिल्याऊचुः॥ ॥कार्त्तिकस्यसितेपक्षेअन्नकूटंसमाचरेत्॥गोवर्धनोत्सव
स्तत्रश्रीविष्णुःप्रीयतामिति॥१॥ ॥ऋषयऊचुः॥ ॥कोसौगोवर्द्धनोदेवःकस्मात्तंपरिपूजयेत्॥कस्मात्तदुत्स
वःकार्यःकृतेकिंचफलंभवेत्॥२॥ ॥वालखिल्याऊचुः॥ ॥एकदाभगवान्कृष्णोगतोगोपालकैःसह॥गृही
त्वागाःप्रतिपदिकार्त्तिकस्यगतोवने॥३॥तत्रनानाविधालोकागोप्यश्चापिसहस्रशः॥गोवर्धनंसमीपेतु
कुर्वंत्युत्सवमादरात्॥४॥खाद्यंलेह्यंचचोष्यंचपेयंनानाविधंकृतम्॥कृत्वानगस्तथान्नानांनृत्यंतिचप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेजनाः ॥५॥ नानापताकाः संगृह्य केचिद्धावंति चाग्रतः ॥ केचिद्गोपाः प्रनृत्यंति स्तुवंति च तथा परे ॥६॥ इतस्ततो वि
तानानि तोरणानि सहस्रशः ॥ दृष्ट्वैवं कौतुकं कृष्णो वाक्यमेतदुवाच ह ॥७॥ ॥कृष्ण उवाच॥ ॥उत्सवः क्रियते क
स्य देवता का च पूज्यते ॥ पक्वान्नं खादनार्थाय कल्पितो चोत्सवोऽय वा ॥८॥ न भक्षयंति ये देवास्तेभ्योऽन्नं तु प्रदी
यते ॥ प्रत्यक्षभोजिनो देवास्तेभ्योऽन्नं तु न दीयते ॥९॥ दृष्ट्वा दर्शी भाव बुद्धिं गोपाला वेधसाकृताः ॥ ॥गोपाला ऊ
चुः॥ ॥एवं मा वद कृष्ण त्वं वृत्रहंतुर्महोत्सवः ॥१०॥ वार्षिकः क्रियतेऽस्माभिर्देवेंद्रस्य तु तुष्टये ॥ इंद्रं पूजय भद्रं ते भ
विष्यति न संशयः ॥११॥ यः करोति च देवेंद्र महोत्सवमिमं वरम् ॥ दुर्भिक्षं च तथावृष्टिर्देशे तस्य न जायते ॥१२॥
तस्मात्त्वमपि कृष्णात्र कुरूत्सवमनेकधा ॥ ॥श्रीकृष्ण उवाच॥ ॥अयं गोवर्धनः साक्षाद्वृष्टि सौभाग्यकारकः ॥
१३॥ मथुरास्थैर्व्रजस्थैश्च सर्वथायं प्रयत्नतः ॥ हित्वैनं पूजितं लोका वृथेंद्रः पूज्यते कथम् ॥१४॥ उत्सवः क्रि
यतामस्य प्रत्यक्षोऽयं भुनक्ति च ॥ करिष्यति कृषिं सम्यक् उपसर्गान्हनिष्यति ॥१५॥ यदा यदा संकटं मे महदा
गत्य जायते ॥ तदा तदा पूजया मि दृश्यं गोवर्द्धनं गिरिम् ॥१६॥ श्रवणे श्रवणे गोपा वार्ताः कुर्वंति किंचिदम्
तेषां मध्ये कैश्चिदुक्तं कृष्णोक्तं क्रियतामिति ॥१७॥ यदा भक्षति चान्नं वै नगो गोवर्द्धनस्तदा ॥ तदा कृष्णोक्तमखिलं
सत्यमेव भविष्यति ॥१८॥ सर्व एव तदा गोपा विनिश्चित्य च नंदनम् ॥ वचनं प्राहुरित्थं चेन्निश्चयोऽस्ति तथा कुरु
॥१९॥ सर्वेषामग्रणीर्भूत्वा गोवर्द्धनमहोत्सवम् ॥ ततः कृष्णस्तथेत्युक्त्वा सूत्सवे कृतनिश्चयः ॥२०॥ नानासाम-
ग्रिकं चक्रुर्यथोक्तं नंदसूनुना ॥ नानावस्त्राणि पात्राणि चास्तृतानि नगाग्रतः ॥२१॥ तत्र दत्तान्नपुंजस्तु यथा गो
वर्धनो महान् ॥ भक्ताः सूपानि चाकाश्च कांजिकं वटकास्तथा ॥२२॥ पूरिकाद्यं च लड्डूकाः शाष्कुल्यो मंडकादिकं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुग्धंदधिघृतंक्षौद्रंलेह्यंचोष्यंतथामिषम्॥ २३॥ कथिकाद्यंसर्वमपितत्रदत्वावचोब्रवीत्॥ ॥श्रीकृष्णउवाच॥ ॥मंत्रं
पठित्वागोपालानेत्रेसंमीलयंतुच॥ २४॥ गोवर्द्धनेनभोक्तव्यंसर्वमन्नंनसंशयः॥ ॥श्रीकृष्णउवाच॥ ॥गोवर्धनध
राधारगोकुलत्राणकारक॥ २५॥ बहुबाहुकृतच्छायगवांकोटिप्रदोभव॥ लक्ष्मीर्यालोकपालानांधेनुरूपेणसंस्थि
ता॥ २६॥ घृतंवहतियज्ञार्थेममपापंव्यपोहतु॥ पठित्वैवंमंत्रयुगंसर्वेमुद्रितलोचनाः॥ २७॥ कृष्णोगोवर्धनंविश्य
सर्वमन्नमभक्षयत्॥ भक्षणावसरेकैश्चिद्दृत्तैर्दृष्टोगिरिस्तथा॥ २८॥ अतीवाभूत्तदाश्चर्यंतच्चेतसिमुनीश्वराः
ततोनाडीद्वयात्कृष्णोगोपान्वाक्यमुवाचसः॥ २९॥ अहोगोवर्धनेनात्रक्षणात्भुक्तमिहस्फुटम्॥ पश्यंतुस
र्वेगोपालाःप्रत्यक्षोयंनसंशयः॥ ३०॥ यद्यस्तिसुखवांछावःकुर्वंत्वेतन्महोत्सवम्॥ इतिश्रुत्वावचस्तस्यस
र्वेविस्मितमानसाः॥ ३१॥ गोवर्धनोत्सवंचक्रुरैंद्राच्छतगुणंतदा॥ इंद्रोत्सवंद्रष्टुकामःसमागच्छत्सनारदः
गोवर्द्धनोत्सवंदृष्ट्वादेवेंद्रस्यसभांययौ॥ ३२॥ देवेंद्रेणकृतातिथ्योवारंवारंप्रणोदितः॥ नोवाचवचनंकिंचिद्दे
वेंद्रःप्रत्यभाषत॥ ३३॥ ॥इंद्रउवाच॥ ॥युष्माकंकुशलंविप्रवर्ततेवानवेतिवा॥ मदग्रेकथ्यतांदुःखंमुनी-
श्वरहराम्यहम्॥ ३४॥ ॥नारदउवाच॥ ॥अस्माकंकिंमुनींद्राणामिंद्रदुःखस्यकारणम्॥ परंगोवर्धनःशैल
इंद्रोजातोविलोकितः॥ ३५॥ त्वदुत्सवेपूज्यतेसौगोपालैर्गोकुलेहरे॥ अतःपरंयज्ञभागान्नटहष्यतिसएवहि
॥३६॥ इंद्रासनंतथेंद्राणींक्रमात्सैवग्रहीष्यति॥ यस्यवीर्यंचसर्वत्रतस्यराज्यंप्रजायते॥ ३७॥ किमस्माकं-
मुनींद्राणांयएवेंद्रासनंवसेत्॥ वर्षाद्वामासषट्काद्वाद्द्रष्टव्योसौसमागतः॥ ३८॥ इत्थमुक्त्वैवदेवेंद्रंप्रययौ
नारदोभुवि॥ इत्थंनारदवाक्यंसश्रुत्वाशक्रोभ्यभाषत॥ ३९॥ अहोआवर्तसंवर्तद्रोणनीलकपुष्कराः॥ सर्वेमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घाजलंगृत्सकरकाभिःसमन्विताः॥५०॥प्रयांतुगोकुलंशीघ्रंमारयंतुच्चबल्लवान्॥गोवर्द्धनंस्फोटयंतुवज्रपातैरनेकशः॥५१
घातयंतुचगाश्चापिगृहाण्युच्चाटयंतुच॥ततोघनघटाघोषोगोकुलेभून्मुनीश्वराः॥५२॥जातोरात्र्यंधकारोथमध्यान्हस
मयेतदा॥कंपिताबल्लवाःसर्वेकिमकांडेत्युपस्थितम्॥५३॥ववर्षुबहुपानीयंकरकाभिस्तदाघनाः॥ ॥गोपालाऊचुः
॥ ॥हाकृष्णकृष्णहेकृष्णकिमिदानींविधीयताम्॥५४॥मृतास्मबल्लवाःसर्वेकुपितोयंहिवासवः॥ ॥श्रीकृष्णउवाच॥
निमील्याक्षीणिभोगोपाध्येयोगोवर्द्धनोनगः॥५५॥रक्षाकर्त्तासएवास्तिनान्योस्तिजगतीतले॥इत्युक्त्वोत्पाट्यतंशैलं
तत्तलेस्थापितास्तुते॥५६॥ततःप्रोवाचवचनंगोपान्प्रतिबलानुजः॥ ॥श्रीकृष्णउवाच॥ ॥अहोगोवर्द्धनेनैतत्स्थ
लंदत्तंव्रजेव्रजाः॥५७॥अन्यःकोस्तिस्थलंदातुंप्रत्यक्षोयंनगोत्तमः॥एवंसप्तदिनंतोयंवृष्टंमुसलधारया॥५८॥
नानादेशायुर्नाशंनगोपाःशरणंययुः॥गोवर्धनस्यनाम्नैवकृष्णोनित्यंप्रयच्छति॥५९॥पक्वान्नानिचगोपेभ्यस्त
त्रतेसुखमावसन्॥इत्येवकौतुकंदृष्ट्वासत्यलोकंययौमुनिः॥६०॥ब्रह्मन्किंत्वंप्रसुप्तोसिजायतेसृष्टिनाशनम्॥त-
स्माच्छीघ्रंगोकुलेत्वंगत्वावृष्टिंनिवारय॥६१॥ ॥ब्रह्मोवाच॥ ॥किमर्थंजायतेवृष्टिःकथंवृष्टिर्विनाशनम्॥क-
श्चदैत्यःसमुत्पन्नःसर्वमाख्याहिमेमुने॥६२॥ ॥नारदउवाच॥ ॥नोत्पन्नोदैत्यराट्कश्चित्त्यक्तःशक्रोत्सवो
भुवि॥यादवैरितिसंक्रुद्धइंद्रएवंप्रवर्षति॥६३॥इतितस्यवचःश्रुत्वाहंसमारुह्यविश्वसृट्॥आगतोयत्रशक्रो
स्तिक्रोधादेवंप्रवर्षति॥६४॥ ॥ब्रह्मोवाच॥ ॥कथंव्यवसिताबुद्धिरीदृशीतेसुरेश्वर॥त्रैलोक्यनाथोभगवान्नि
र्जेतव्यःकथंत्वया॥६५॥एकेनैवकरांगुल्याप्ययगोवर्धनोधृतः॥ईर्ष्यातेनकथंसाकंत्वयाशक्रविधीयते॥
६६॥इतिब्रह्मवचःश्रुत्वामेघान्संस्तभ्यवासवः॥प्रणिपत्यचतंकृष्णंशक्रोवचनमब्रवीत्॥६७॥क्षंतव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्कृतिर्विष्णोर्दासोहं शरणंगतः॥ यद्रोचतेतत्प्रदेयमपराधापनुत्तये॥५८॥ ॥श्रीकृष्णउवाच॥ ॥अज्ञात्वातवसा
मर्थ्यंगोपालैरचितंत्विदम्॥ एषांदंडस्तुयोग्योयंसम्यगेवत्वयाकृतम्॥५९॥अहंकनीयांस्तेभ्राता तवाज्ञापरि
पालकः॥ शरणागतजातीनांरक्षणंतुमयाकृतम्॥६०॥यदिप्रसन्नोदेवेशउत्सवोयंप्रदीयताम्॥गोवर्ध-
नायगिरयेगोकुलंरक्षितंयतः॥६१॥शक्रोपिचतथेत्युक्त्वा तत्रैवांतरधीयत॥ गतेशक्रेगिरींद्रंतंसंस्थाप्यहरिर
ब्रवीत्॥६२॥ ॥श्रीकृष्णउवाच॥ ॥गोपादृष्टंतुमहात्म्यमद्भुतंशैलजंतुयत्॥ अद्यारभ्यप्रकर्त्तव्योमहान्गो
वर्द्धनोत्सवः॥६३॥ गोवर्द्धनेनशैलेननिखिलातुधराधृता॥ एतत्सारमजानद्भिः कथंसंक्रीडितंपुरा॥६४
अद्यपर्वतराजस्त्वसर्वंब्रूतेममाग्रतः॥ एतत्सेवाप्रभावेनबलंलब्धंमयामहत्॥६५॥प्रतिसंवत्सरंतस्मादन्न
कूटंविधीयताम्॥ गवांभवतिकल्याणंपुत्रपौत्रादिसंततिः॥६६॥ ऐश्वर्यंचसदासौख्यंभवेद्गोवर्द्धनोत्स
वात्॥ कृतंयत्कार्त्तिकस्नानंजपहोमार्चनादिकम्॥६७॥सर्वंनिष्फलतामेतिनकृतेपर्वतोत्सवे॥ एवमु-
क्तास्त्वतेगोपाःसर्वंसत्यममन्यत॥६८॥ ययुःकृष्णादयःसर्वेनवमेहनिगोकुलम्॥ ॥वालखिल्याऊचुः
॥ ॥इत्येतत्सर्वमाख्यातमस्माभिस्तुमुनीश्वराः॥६९॥ श्रीकृष्णस्यतुसंतुष्ट्यैत्वन्नकूटंविधीयतां॥नाना
प्रकारशाकानिदेशकालोद्भवानिच॥७०॥ पक्वान्नानिविचित्राणिकुर्याच्छक्त्यनुसारतः॥ सर्वान्नपर्वतं
कुर्याच्छ्रीकृष्णायनिवेदयेत्॥७१॥ गोवर्द्धनस्वरूपायमंत्रोकृष्णोदितोपठन्॥ एवंयःकुरुतेलोकेविष्णु
लोकेमहीयते॥७२॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येसप्तदशोऽध्यायः॥ ॥वालखिल्या
ऊचुः॥ ॥कार्तिकस्यसितेपक्षेद्वितीयायमसंज्ञिता॥तत्रापराह्णेकर्त्तव्यंसर्वथैवयमार्चनम्॥१॥प्रत्यहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमुनागत्य यमं संप्रार्थयेत्सुरा॥ भ्रातर्मम गृहे याहि भोजनार्थं गणावृतः॥ २॥ अद्य श्वो वा परश्वो वा प्रत्यहं वदते यमः॥ का-
र्यव्याकुलचित्तानामवकाशो न जायते॥ ३॥ तदैकदा यमुनया बलात्कारान्निमंत्रितः॥ स गतः कार्त्तिके मासि द्वितो-
यायां मुनीश्वराः॥ ४॥ नारकीयजनान्मुक्त्वा गणैः सह रवेः सुतः॥ कृतातिथ्यो यमुनया नानापाकाः कृताः स्वगः॥ ५॥
कृताभ्यंगो यमुनया तैलैर्गंधमनोहरैः॥ उद्वर्तनं लापयित्वा स्नापितः सूर्यनंदनः॥ ६॥ ततोलंकारिकं दत्तं नानाव-
स्त्राणि चंदनम्॥ माल्यानि च प्रदत्तानि मंचोपरि उपाविशत्॥ ७॥ पक्वान्नानि विचित्राणि कृत्वा सा स्वर्णभा-
जने॥ यमाया भोजयेद्देवी यमुना प्रीतमानसा॥ ८॥ भुक्त्वा यमोपि भगिनीमलंकारैः समर्चयत्॥ नानावस्त्रैस्ततः प्राह-
वरं वरय भामिनि॥ ९॥ इति तद्वचनं श्रुत्वा यमुना वाक्यमब्रवीत्॥ ॥यमुनोवाच॥ ॥प्रतिवर्षं समागच्छ भोजना-
र्थं तु मद्गृहे॥ १०॥ अद्य सर्वे मोचनीयाः पापिनो नरकाधम॥ ये येव भगिनीहस्तात्करिष्यंति च भोजनम्॥ ११॥ ते-
षां सौख्यं प्रदेहि त्वमेतदेव वृणोम्यहम्॥ ॥यम उवाच॥ ॥यमुनायां तु यः स्नात्वा संतर्प्य पितृदेवताः॥ १२॥ भुक्तेच
भगिनीगेहे भगिनीं पूजयेदपि॥ कदाचिदपि मद्द्वारं न स पश्यति भानुजे॥ १३॥ वीरेशैशानदिग्भागे यमतीर्थं प्र-
कीर्त्तितम्॥ तत्र स्नात्वा चाविधिवत्संतर्प्य पितृदेवताः॥ १४॥ पठेद्देतानि नामानि आमध्यान्हं नरोत्तमः॥ सूर्यस्या-
भिमुखो मौनी दृढचित्तः स्थिरासनः॥ १५॥ यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः॥ भूताधिपो द-
त्तकृतानुसारी कृतांत मेतद्दशभिर्जपंति॥ १६॥ ततो यमेश्वरं पूज्य भगिनीगृहमाव्रजेत्॥ मंत्रेणानेन च तया भोजि-
तः पूर्णमादरात्॥ १७॥ भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिदं शुभम्॥ प्रीतये यमराजस्य यमुनाया विशेषतः॥ १८
ततः संतोष्य भगिनीं वस्त्रालंकरणादिभिः॥ स्वप्नेपि यमलोकस्य भविष्यति न दर्शनम्॥ १९॥ नृपैः कारागृहे ये च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थापितामम वासरे॥ अवश्यंतेप्रेषणीयाभोजनार्थंस्वसुर्गृहे॥ २०॥ विमोक्तव्यामयापापानरकेभ्योद्यवासरे॥ ये-
घ बद्धिंकरिष्यंतितेताभ्यामम सर्वथा॥ २१॥ कनीयसीस्वसानास्तितदाज्येष्ठागृहंव्रजेत्॥ तदभावेसपत्न्याथाः
पितृव्या स्तदभावतः॥ २२॥ तदभावेमातृस्वसामातुल स्यात्मजातथा॥ सापत्नगोत्रसंबंधैः कल्पयेदथवाक्रमम्॥
२३॥ सार्वाभावेमाननीयाभगिनीकाचिदेवहि॥ गोनद्याद्यथवातस्या अभावेसतिकारयेत्॥ २४॥ तदभावेप्यर-
ण्यादिकल्पयित्वासहोदराम्॥ अस्यांनिजगृहेदेवीनभोक्तव्यंकदाचन॥ २५॥ येभुंजंतेदुराचारानरकेतेपतंति
च॥ स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनम्॥ २६॥ दानानिचप्रदेयानिभगिनीभ्योविशेषतः॥ श्रावणेतुपि
तृव्यस्यकन्याहस्तेनभोजनम्॥ २७॥ मातुलस्यसुताहस्ताद्भोक्तव्यंभाद्रमासके॥ पितुर्भ्रातुः स्वसुः कन्येआ-
श्विनेतुतयोः क्रमात्॥ २८॥ अवश्यंकार्त्तिकेमासिभोक्तव्यंभगिनीकरात्॥ एवमुक्त्वाधर्मराजोययौसंयमिनीं
ततः॥ २९॥ तस्माहृषिवराः सर्वेकार्त्तिकेव्रतकारिणः॥ भुंजंतिभगिनीहस्तात्सत्यंसत्यंनसंशयः॥ ३०॥ यमद्विती
यांयः प्राप्यभगिनीगृहभोजनम्॥ नकुर्याद्वर्षजंपुण्यंनश्यतीतिरवेः श्रुतिः॥ ३१॥ यातुभोजयतेनारीभ्रातरंयुग्मा
तृकेनथौ॥ अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात्॥ ३२॥ भ्रातुरायुः क्षयोनूनंनभवेत्तत्रकर्हिचित्॥ अपरा
ह्णव्यापिनीसाद्वितीयाभ्रातृभोजने॥ ३३॥ अज्ञानाद्यदिवामोहान्नभुक्तंभगिनीगृहे॥ प्रवासिनात्वभावाद्वाज्व
रितेनाथबंदिना॥ ३४॥ एतदाख्यानकंश्रुत्वाभोजनस्यफलंलभेत्॥ ३५॥ इतिसनत्कुमारसंहितायांकार्तिक
माहात्म्ये अष्टादशोऽध्यायः॥ ॥ वालखिल्याऊचुः॥ ॥ कार्तिकेशुक्लनवमीतत्रप्रोक्ताप्रयुगं॥ पूर्वापराण्हगा
ग्राह्याक्रमाद्दानोपवासयोः॥ १॥ अत्रकूष्मांडकोनामहतोदैत्यस्तुविष्णुना॥ तद्रोमभिः समुद्भूतावल्यः कूष्मां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डसंभवाः॥ २॥ तस्मात्कूष्मांडदानेन फलमाप्नोति निश्चितम्॥ अस्यामेव नवम्यां तु कुर्यात्कृष्णोत्सवं नरः॥ ३॥ स्व
शाखोक्तेन विधिना तुलस्याः करपीडनम्॥ कन्यादान फलं तस्य जायते नात्र संशयः॥ ४॥ कार्तिके शुक्लनवमीमवाप्य
विजितेंद्रियः॥ हरिं विधाय सौवर्णं तुलस्या सहितं शुभम्॥ ५॥ पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम्॥ एवं य
थोक्तविधिना कुर्याद्वैवाहिकं विधिम्॥ ६॥ ग्राह्यं त्रिरात्रमत्रैव नवम्यामनुरोधतः॥ मध्याह्नव्यापिनी ग्राह्या नवमी
पूर्वविधिना॥ ७॥ धात्र्यश्वत्थौ य एकत्र पालयित्वा समुद्वहेत्॥ न नश्यते तस्य पुण्यं कल्पकोटिशतैरपि॥ ८॥ अत्रैवो
दाहरंतीममितिहासं पुरातनम्॥ बभूव विष्णुकांच्यां तु क्षत्रियः कनकाभिधः॥ ९॥ धनाढ्यो वैश्यवृत्तिश्च वैष्णवो
राजपूजितः॥ बहुकालो गतस्तस्य विनापत्यं मुनीश्वराः॥ १०॥ ततो नानाव्रतैर्जाता कन्या कमललोचना॥ सुरूपा लक्षणो
पेता नानागुणसमन्विता॥ ११॥ पिता तस्या नाम चक्रे किशोरीति च विश्रुतम्॥ एकदा तद्गृहे यातो जन्मपत्रनिरीक्ष
कः॥ १२॥ दर्शयित्वा जन्मपत्रं कथमस्या भवेदिति॥ ततस्तेन क्षणं ध्यात्वा कनकः शृणु मे वचः॥ १३॥ यदि ब्रवीमि
सत्यं चेत्तव दुःखं भविष्यति॥ यद्यसत्यमहं ब्रूयां मिथ्यात्वं मम जायते॥ १४॥ तस्मात्सत्यं वदिष्यामि रोचते य
था कुरु॥ अस्याः करग्रहं कुर्याद्यः सौ वज्रान्मरिष्यति॥ १५॥ इति तस्य वचः श्रुत्वा जनको दुःखितोऽभवत्॥ न
चकार विवाहोऽस्याः सा च ब्राह्मणभोजने॥ १६॥ नियुक्ता न्यगृहं दत्तं नानेयामन्त्रु खाग्रतः॥ दृष्ट्वेमां रूपसंप
न्नां दुःखं मे वर्द्धयिष्यति॥ १७॥ स्थित्वान्यस्मिन्गृहे सा तु द्विजातिथ्यमचीकरत्॥ तत्रागाद्दैवयोगे
न कदाचिद्द्विजपुंगवः॥ १८॥ यात्रार्थं विष्णुकांच्यां या वैशाखे मासि शंकरः॥ हेमको विप्रशुश्रूषीज्ञा
त्वात्रैव समागतः॥ १९॥ आगत्यांगणमध्ये तु उपविष्टो द्विजोत्तमः॥ किशोर्यागत्य चातिथ्यं शंकरस्य तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंतदा॥ २०॥ दृष्ट्वातांतरुणींनम्रां स्त्रवेषांविनयान्विताम्॥ अजातकरपीडांचस सखींपृष्ट्वाभ्युवाचसः॥ २१॥ ॥ शंकरउवा-
च॥ ॥ चंदनेवदशीघ्रंत्वंकिशोरीनविवाहिता॥ किमत्रकारणंजातातरुणीकामरूपिणी॥ २२॥ इतिनहृच्चनंश्रु-
त्वाचंदनासर्वमब्रवीत्॥ तदाकृपालुनातेन तस्मिन्नेविनिवेदितम्॥ २३॥ अस्यैमंत्रंप्रयच्छामिश्रीविष्णोर्द्वाद-
शाक्षरम्॥ करोतुवर्षत्रितयंजपमस्य स्त्रलोचना॥ २४॥ प्रातःस्नानवतीचास्तु तुलसीवनपालिका॥ कार्त्तिकस्य
सितेपक्षेनवम्यांविष्णुनासह॥ २५॥ सौवर्णेनतुलस्याश्च विवाहंचकरोत्वियम्॥ तेनव्रतप्रभावेनविधवान
भविष्यति॥ २६॥ तस्मित्रापितथेत्युक्तंप्राय श्चित्तंसदत्तवान्॥ किशोर्यैवैष्णवंधर्मंसमग्रंचादिदेशसः॥ २७॥
द्विजेनतेनयत्प्रोक्तं किशोर्यपितथाकरोत्॥ वर्षत्रयंयथाशास्त्रंकिशोर्यातद्व्रतंकृतम्॥ २८॥ चतुर्थेकार्त्तिकेमा
सिकिशोरीस्नपनायच॥ प्रातःकालेगताबालादृष्टामार्गेविलेपिना॥ २९॥ क्षत्रियेणयदादृष्टाप्रापमोहंजडा
त्मकः॥ पृष्टेतस्यास्तुसंलग्नोभावयंस्तामनिंदिताम्॥ ३०॥ केचित्तांददृशुर्दूरात्केचित्पश्यंतिगुप्ततः॥ स्त्रियोपि
तांप्रपश्यंतिपुरुषाणांतुकाकथा॥ ३१॥ यथाद्वितीयाचंद्रस्य दर्शनेचोत्सुकाजनाः॥ तथारात्रौप्रतीक्ष्यंतेतद्दूरेस
कलाजनाः॥ ३२॥ निमेषमात्रमर्केणदृष्टास्थित्वातुबालिका॥ अधिकंकिंवर्णनीयंतत्सौंदर्यंमुनीश्वराः॥ ३३॥
केचिद्वदंतिदेवीयंनागकन्येतिचापरे॥ रुद्रसंमोहनार्थायजातासामोहिनीतिच॥ ३४॥ सानपश्यतिलोकांश्चनमा
र्गेनसखीगणान्॥ ध्यायंतीहृदयेविष्णुंतुलसीदेवरूपिणीम्॥ ३५॥ तांगृहीतुंमनश्चक्रेविलेपीद्रव्यवान्बली
नानाभेदाःकृतास्तेन नलेभेचांतरंक्वचित्॥ ३६॥ मालाकारगृहंगत्वातस्यैद्रव्यंप्रयच्छत॥ येनकेनप्रकारेणकि ३०
शोर्याःसहसंगमः॥ ३७॥ यथास्यात्क्रियतांभद्रेदेयमस्माच्चतुर्गुणम्॥ तथाचबहवोपायादृष्टास्तद्ग्रहणायच॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३८॥ नददर्शततोपायमवदत्सा विलेपिनम्॥ नदृश्यतेमयोपायस्त्वयायस्प्रोच्यतेधुना॥ ३९॥ मयातदेववक्तव्यं द्रव्य
ग्रहणसिद्धये॥ ॥विलेप्युवाच॥ ॥तवकन्यातुभूत्वाहंनयामिकुसुमानिच॥ ४०॥ अग्रेयद्भाविभवतुगृहाणा
न्हिशतंशतम्॥ तयापिचतथेत्युक्तासप्तम्यान्निश्चयः कृतः॥ ४१॥ अष्टम्यांसा गतातत्रकिशोरीतामुवाचह॥
मालाकृतेश्वोनवमीतुलस्याःपाणिपीडनम्॥ ४२॥ तिष्ठत्यतस्त्वयानेयासुकुंदाःपुष्पसंभवाः॥ ॥मालिन्युवाच
॥ ॥मत्कन्याचागताग्रामान्नानाकौतुककारिणी॥ ४३॥ यद्यस्योक्तंत्वयाबालेसमानेष्यतिसत्वरम्॥ तयासापित
थेत्युक्तामालिनीस्वगृहंययौ॥ ४४॥ कथितःसर्ववृत्तांतोविलेप्यग्रेततोभवत्॥ प्रासामयेंद्रपदवीत्येवंसुरुस्वमवा-
पसः॥ ४५॥ मालिन्यारचितारात्रौसुकुंदाविविधास्तदा॥ ॥वालखिल्याऊचुः॥ ॥विष्णुकांच्यांतदाराजाजय
सेनोबभूवह॥ ४६॥ तस्यपुत्रोसुकुंदोभूत्सूर्यभक्तिपरायणः॥ किशोर्यास्तुश्रुतातेन वार्त्तेयमतिसुंदरा॥ ४७
॥ तदातेनसुकुंदेनसंकल्पः कृतएवहि॥ किशोरीयदिभार्यामेभविष्यति दिवाकर॥ ४८॥ तदान्नमहमश्नामि
नान्यथास्यान्मृतिर्मम॥ कृत्वेत्थंसतुसंकल्पमुपवासांश्वकारसः॥ ४९॥ सप्तमेहनिसूर्योसौस्वप्नेवचनमब्रवी
त्॥ किशोर्याविधवायोगोवर्त्ततेतेकथंभवेत्॥ ५०॥ सातेपत्नीःप्रदास्यामित्वन्यांपद्मायतेक्षणाम्॥ ॥सुकुंद
उवाच॥ ॥यदिदेवप्रसन्नोसि विश्वंसृजसित्वंप्रभो॥ ५१॥ बालवैधव्ययोगंचहंतुंत्वंचक्षमोत्यसि॥ इतित
स्यवचःश्रुत्वासांत्वनाबहुलाकृता॥ ५२॥ नमन्यतेसुकुंदोसौ तथेत्युक्त्वागतोरविः॥ तुलसीव्रतमहात्म्यात्स्व
प्नेभूत्कनकस्यतु॥ ५३॥ इयंकन्यात्वयादेयासुकुंदायामलायच॥ तुलस्युद्वाहमाहात्म्याद्विधवात्वंगमिष्यति॥ ५४॥ रा
त्रौस्वप्नःकिशोर्यास्तुतस्यांचैवाप्यजायत॥ आगतःकन्यकाकाचिद्धात्रीसहसमन्विता॥ ५५॥ भर्तारंवदतिस्वप्नेमम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माताकिशोरिका॥ तद्भर्तापितथेत्युक्त्वाप्रदास्येबलिमुत्तमं॥५६॥ एतद्दत्तेन पश्चात्तुविवाहोस्याभविष्यति॥ स्व
प्नंश्रुत्वाबलेर्दीनं सार्वैचिंतातुराभवत्॥५७॥ क्व द्वादशाक्षरीविद्या क्वेदंविष्णुसमर्चनम्॥ नरकद्वारमूलं क्वम
द्दत्तासशक्रमारणम्॥५८॥ एवंसातुसमुत्थाय स्वप्नंप्रेयमितिनिश्चितम्॥ भावयित्वासमाहूयचंदनांवाक्यमब्रवीत्
॥५९॥ निवेद्यदृष्टंस्वप्नंतुकीदृगस्यफलंवद॥ ॥चंदनोवाच॥ ॥ फलंतुसम्यक्कल्याणितवानिष्टंविनश्यति॥
६०॥ विवाहोभविताशीघ्रंतुलसीव्रतकारणात्॥ इत्थंस्वप्नफलंश्रुत्वातावत्कुक्कुटशब्दितं॥६१॥ श्रुत्वासासह-
सोत्थायस्नानोद्यममचीकरत्॥ यावदायातिसास्नानंकृत्वागेहंकिशोरिका॥६२॥ तावद्विलेपीमालिन्याःपु
त्रीभूत्वासमाययौ॥ कृताःकेशाश्च गोपुच्छैःश्मश्रुत्युत्पाटितंबलात्॥६३॥ अंतरेशाटकंगृह्यनिंबुभ्यांचस्त
नौकृतौ॥ सर्वालंकारशोभाढ्याकटाक्षयतिचापरान्॥६४॥ नज्ञातासातुकेनापिपुमांस्त्रीरूपधारकः॥ ध्या
नंकृत्वाप्रसार्येतेतयाहस्तौयदातदा॥६५॥ दत्तेविलेपिःपुष्पाणिविलोकयतिसर्वतः॥ कथमस्यामम स्प-
र्शोभविष्यतिविचिंतयत्॥६६॥ एवंदिनत्रयंतस्यप्रयातंतुमुनीश्वराः॥ तस्मिन्नहनिसंजातःकनकःशोक-
पीडितः॥६७॥ किंकार्यमधुनास्माभीराजपुत्रोवरिष्यति॥ एवंचिंतयतस्तस्यप्रातःकालोबभूवह॥६८॥
राजलोकाःसमायाताग्रहीत्वावस्त्रवाहनम्॥ अभ्यंतरंसमागत्य मंत्रीवचनमब्रवीत्॥६९॥ गृहेस्तितवक-
न्यैकासुकुंदार्थेप्रदीयताम्॥ माविचारोस्तुभवतोनृपाज्ञापरिपाल्यताम्॥७०॥ कनकेनतथेत्युक्तंममभा
ग्यमुपस्थितं॥ महाराजकुमारस्यवधूःकन्याभविष्यति॥७१॥ प्रोवाचमंत्रिणंचापिद्वादश्यांलग्नमुत्तमम्॥— ३१
रात्रौतिष्ठतियुग्माख्यंरविःपृष्ठेविधुश्चखे॥७२॥ भवेभौमोगुरुर्धर्मेपंचमेबुधभार्गवौ॥ शनिस्तृतीयेरैरा—

११ १० १२ ८ ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्विवाहसमयः सतु ॥ ७३॥ उभौसंभृतसंभारावुभावपिधनान्वितौ॥ द्वादश्यामाययौसायंराजपुत्रः ससैनिकः॥ ७४
॥ अब्रवीत्तत्रकनकंतेकीराजपुरोहितः॥ ॥ तेक्स्युवाच॥ ॥ अथोनिरोधः क्रियतांकिशोर्याश्चनृपाज्ञया॥ ७५॥ भ-
विष्यतिमहादेवीनोदृश्यापुरुषैः क्वचित्॥ इतितद्वचनंश्रुत्वापुरुषास्तनिराकृताः॥ ७६॥ जायारूपीविलेपीतुदे-
वात्तत्रैवसंस्थितः॥ ततोर्द्धरात्रवेलायांमुकुंदोभ्यंतरेययौ॥ ७७॥ तुलस्यग्रेस्थितम्बालाकिशोरीसंस्मरद्धरिम्॥
ततोघनघटाशब्दस्तुमुलः समपद्यत॥ ७८॥ महावायुर्ववौतत्रप्रशांताः सर्वदीपकाः॥ विद्युल्लताश्चस्फुरिताअंधी
भूतोखिलोजनः॥ ७९॥ मिथ्यानभास्करस्त्वंचोमुकुंदोचिंतयत्हृदि॥ अन्यैःप्रतर्कितंलोकैर्वैधव्यस्यतुकारणम्॥
८०॥ भीतोमुकुंदोहृदयेयावत्ध्यायतिभास्करम्॥ तस्यांसंधौधृतंतस्याः करपद्मंविलेपिना॥ ८१॥ तस्याः कर
स्यसंसर्गात्स्वर्गाद्वज्रंपपातके॥ नीतस्तेनविलेपीतुतत्कालंयममंदिरम्॥ ८२॥ बहिरासीत्कलकलोमुकुंदोयं
मृतस्त्विति॥ क्षणादेवततोज्ञातंमालाकारस्तुतामृता॥ ८३॥ ततस्तयोर्विवाहोभूद्राज्यंप्रापकिशोरिका॥ कि
शोर्याश्चसमुत्पन्नोभर्त्तारस्तुलसीव्रतात्॥ ८४॥ आदौशास्त्रंसत्यमासीत्ततोदेवोदिवाकरः॥ तुलसीव्रतमा
हात्म्यात्कथंनस्युर्मनोरथाः॥ ८५॥ सौभाग्यार्थंधनार्थंचविद्यार्थंवुनिवृत्तये॥ संतत्यर्थंप्रकर्त्तव्यंतुलस्याःपा-
णिपीडनम्॥ ८६॥ इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येतुलसीविवाहोनामएकोनविंशतितमोऽध्यायः
॥ ॥ वालखिल्याऊचुः॥ ॥ कार्त्तिकस्यामलेपक्षेस्नात्वासम्यग्यतव्रतः॥ एकादश्यांतुगृह्णीयाद्व्रतंपंचदिना-
त्मकम्॥ १॥ शरपंजरसुप्तेनभीष्मेणतुमहात्मना॥ राजधर्मामोक्षधर्मादानधर्मास्ततः परम्॥ २॥ कथिताःपां
डुदायादैः कृष्णेनापिश्रुतास्तदा॥ ततःप्रीतेनमनसावासुदेवेनभाषितम्॥ ३॥ धन्यधन्योसि भीष्म-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वंधर्माः संश्राविता स्त्वया॥ एकादश्यां कार्त्तिकस्य याचितंच जलंत्वया॥ ४॥ अर्जुनेन समानीतं गांगं बालस्य वेगतः
॥ तुष्टानि तव गात्राणि तस्माद्द्यादिना वधि॥ ५॥ पूर्णातं सर्वलोकास्त्वं तर्पयंत्वर्घ्यदानतः॥ तस्मात्सर्वप्रयत्नेन मम
संतुष्टिकारकम्॥ ६॥ एतद्व्रतं प्रकुर्वंतु भीष्मपंचकसंज्ञितम्॥ कार्तिकस्य व्रतं कृत्वा न कुर्याद्भीष्मपंचकम्॥
७॥ समग्रं कार्तिकव्रतं वृथा तस्य भविष्यति॥ अशक्तश्चेन्नरो भूयादसमर्थश्च कार्त्तिके॥ ८॥ भीष्मस्य पंचकं
कृत्वा कार्तिकस्य फलं लभेत्॥ सत्यव्रताय शुचये गांगेयाय महात्मने॥ ९॥ भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्म
चारिणे॥ सव्येनानेन मंत्रेण तर्पणं सार्वकालिकम्॥ १०॥ व्रतांगत्वात्पूर्णिमायां प्रदेयः पापपूरुषः॥ अपुत्रेण प्रकर्त-
व्यं सर्वथा भीष्मपंचकम्॥ ११॥ यः पुत्रार्थं व्रतं कुर्यात्स स्त्री को भीष्मपंचकम्॥ प्रदत्वा पापपुरुषं वर्षमध्ये स फलं ल
भेत्॥ १२॥ अवश्यमेव कर्त्तव्यं तस्माद्भीष्मस्य पंचकम्॥ विष्णुप्रीतिकरं प्रोक्तं मया भीष्मस्य पंचकम्॥ १३॥-
अत्रैव तु प्रकर्त्तव्यः प्रबोधस्तु हरेः खग॥ हतः शंखासुरो दैत्यो नभसः शुक्लपक्षके॥ १४॥ एकादश्यां गतो विष्णु-
श्चातुर्मास्ये प्रसुप्तवान्॥ क्षीरांभोधौ जागृतो सौ एकादश्यां तु कार्त्तिके॥ १५॥ अतः प्रबोधनं कार्यमेकादश्यां तु
वैष्णवैः॥ उत्तिष्ठोत्तिष्ठ शंखघ्न उत्तिष्ठांभोधिचारक॥ १६॥ कूर्मरूपधरोत्तिष्ठ त्रैलोक्यं मंगलं कुरु॥ उत्तिष्ठो-
त्तिष्ठ वाराह दंष्ट्रोत्क्षिप्त वसुंधर॥ १७॥ उत्तिष्ठ धरणीधार वराहादिकधारक॥ उत्तिष्ठ भुवनाधार त्रैलोक्यं मंगलं
कुरु॥ १८॥ हिरण्याक्षप्राणघातिन् त्रैलोक्यं मंगलं कुरु॥ हिरण्यकशिपुघ्न स्त्वं प्रल्हादानंदकारक॥ १९॥ उ
त्तिष्ठ बलिदर्पघ्न देवेंद्रपददायक॥ लक्ष्मीपते समुत्तिष्ठ त्रैलोक्यं॰॥ २०॥ उत्तिष्ठादितिपुत्रत्वं त्रैलोक्यं॰॥ उ- ३२
त्तिष्ठ हैहयाधीशसमस्तकुलनाशन॥ २१॥ रेणुकाग्रत्व समुत्तिष्ठ त्रैलोक्यं॰॥ उत्तिष्ठ रक्षोदलन अयोध्यास्वर्गदाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॥ समुद्रसेतुकर्त्तास्त्वंत्रै०॥ २२॥ उत्तिष्ठकंसहननमदघूर्णितलोचन॥ उत्तिष्ठहलपाणेत्वंत्रै०॥ २३॥ उत्तिष्ठत्वंगयावा-
सिन्त्यक्तलौकिकहृत्तिक॥ उत्तिष्ठपद्मासनगत्रै०॥ २४॥ उत्तिष्ठम्लेछनिवहखड्गसंहारकारक॥ अश्ववाहयुगांत-
त्वंत्रै०॥ २५॥ उत्तिष्ठोत्तिष्ठगोविंद उत्तिष्ठगरुडध्वज॥ उत्तिष्ठकमलाकांतत्रै०॥ २६॥ इत्युक्त्वाशंखभेर्यादिमातःकालेतु
वादयेत्॥ वीणावेणुमृदंगादिनृत्यगीतादिकारयेत्॥ २७॥ उत्थापयित्वादेवेशंपूजांतस्यविधायच॥ सायंकालेप्रक
र्तव्यस्तुलस्युद्वाहजोविधिः॥ २८॥ अवश्यमेवकर्त्तव्यःप्रतिवर्षंतुवैष्णवैः॥ विधिंतस्यप्रवक्ष्यामियथासांगक्रि
याभवेत्॥ २९॥ विष्णोस्तुप्रतिमांकुर्यात्सलस्यस्वर्णजांशुभाम्॥ तदर्धार्धंतदर्धार्द्धंयथाशक्त्याप्रकल्पयेत्॥ ३०
॥ प्राणप्रतिष्ठांकुर्वीतवतुलसीविष्णुरूपयोः॥ ततउत्थापयेद्देवंपूर्वोक्तैश्चस्तवादिभिः॥ ३१॥ उपचारैःषोडशभिःपू
जयेत्पुरुषोक्तिभिः॥ देशकालौततःस्मृत्वागणेशंतत्रपूजयेत्॥ ३२॥ पुण्याहंवाचयित्वाथनांदीश्राद्धंसमाचरेत्॥
वेदवाद्यादिनिर्घोषैर्विष्णुमूर्त्तिंसमानयेत्॥ ३३॥ तुलसीनिकटेसातुस्थाप्यान्वांतर्हितापटैः॥ आगच्छभगवन्देव-
अर्चयिष्यामिकेशव॥ ३४॥ तुभ्यंदास्यामितुलसींसर्वकामप्रदोभव॥ दद्यात्त्रिवारमर्घ्यंचपाद्यंविष्टरमेवच॥ ३५
॥ ततआचमनीयंचत्रिरुक्त्वाचप्रदापयेत्॥ ततोदधिघृतंक्षौद्रंकांस्यपात्रपुटीकृतम्॥ ३६॥ मधुपर्कंगृहाणत्वं
वासुदेवनमोस्तुते॥ हरिद्रालेपनाभ्यंगंकार्यंसर्वंविधायच॥ ३७॥ गोधूलिसमयेपूज्यौतुलसीकेशवौपुनः॥ पृथ
क्पृथक्तथाकार्यौसंमुखौमंगलंपठेत्॥ ३८॥ ईषद्दृश्येभास्करेतुसंकल्पंतुसमापयेत्॥ स्वगोत्रप्रवराद्युक्त्वात
थात्रिपुरुषादिकम्॥ ३९॥ अनादिमध्यनिधनत्रैलोक्यप्रतिपालक॥ इमांगृहाणतुलसींविवाहविधिनेश्वर॥ ४०
॥ पार्वतीबीजसंभूतांवृंदाभस्मनिसंस्थिताम्॥ अनादिमध्यनिधनांवल्लभांतेददाम्यहम्॥ ४१॥ पयोघटैश्चसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाभिःकन्यावद्वर्धितामया॥त्वत्प्रियांतुलसींतुभ्यंददामित्वंगृहाणभो॥४२॥एवंदत्त्वाचतुलसींपश्चाच्चौपूजयेत्ततः॥
रात्रौजागरणंकुर्याद्विवाहोत्सवपूर्वकम्॥४३॥प्रतिवर्षमिदंकुर्यात् कार्त्तिकव्रतसिद्धये॥४४॥ इतिसनत्कुमारसं
हितायांकार्त्तिकमाहात्म्येतुलसीविवाहकथनंनामविंशतितमोऽध्यायः॥ ॥वालखिल्याऊचुः॥ ॥ ततःप्रभातसम
येतुलसींविष्णुमर्चयेत्॥ वन्हिसंस्थापनंकृत्वाद्वादशाक्षरविद्यया॥ १॥ पायसाज्यक्षौद्रतिलैर्जुहुयादष्टोत्तरं
शतम्॥ ततःस्विष्टकृतंहुत्वादद्यात्पूर्णाहुतिंततः॥२॥आचार्यंचसमभ्यर्च्यहोमशेषंसमापयेत्॥ चतुरोवार्षिका
न्मासान्नियमोयेनयःकृतः॥ ३॥ कथयित्वाद्विजेभ्यस्तत्तथान्यस्यपरिपूजयेत्॥ इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो॥४॥
न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दन॥रेवतीतुर्यचरणद्वादशीसंयुतेनरः॥५॥ नकुर्यात्पारणंकुर्वन्व्रतंनिष्फ
लतांव्रजेत्॥ततोयेषांपदार्थानांवर्जनंतुकृतंभवेत्॥६॥चातुर्मास्येथवाचोर्जेब्राह्मणेभ्यःसमर्पयेत्॥ततःसर्व
समानीयाद्यद्यत्यक्तंव्रतेस्थितम्॥७॥दंपतीभ्यांसहैवात्रभोक्तव्यंचद्विजैःसह॥ ततोभुक्त्युत्तरंयानिगलितानि
दलानिच॥८॥तानिभुक्त्वातुलस्याश्चस्वयंपापैःप्रमुच्यते॥इक्षुदंडंतथाधात्रीफलंकोलिफलंतथा॥९॥भुक्त्वातुभोज
नस्यांतेतस्योच्छिष्टंविनश्यति॥ एषुत्रिषुनभुक्तंचेदेकैकमपियेनतु॥१०॥ज्ञेयउच्छिष्टआवर्षंनरोसौनात्रसंशयः॥त
तःसायंपुनःपूजांइक्षुदंडैश्चशोभितैः॥११॥तुलसीवासुदेवौचकृतकृत्योभवेत्ततः॥ ततोविसर्जनंकृत्वादत्त्वादा
यादिकंहरेः॥१२॥वैकुंठंगच्छभगवंस्तुलसीसहितःप्रभो॥ मत्कृतंपूजनंगृह्य संतुष्टोभवसर्वदा॥१३॥ गच्छ
गच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर॥ यत्रब्रह्मादयोदेवास्तत्रगच्छजनार्दन॥ १४॥ एवंविसृज्यदेवेशमाचार्या
यप्रदापयेत्॥ मूर्त्यादिकंसर्वमेवकृतकृत्योभवेन्नरः॥ १५॥ प्रतिवर्षंकरोत्येवंतुलस्युद्वाहनंशुभम्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहलोकेपरत्रापिविपुलंसयशोलभेत्॥१६॥प्रतिवर्षेतुयःकार्यात्तुलसीकरपीडनम्॥भक्तिमान्धनधान्यैःसंयुक्तो
भवतिनिश्चितम्॥१७॥इतिसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येतुलसीविवाहफलानुकीर्त्तनंनामएकविं
शतितमोऽध्यायः॥ ॥वालखिल्याऊचुः॥ ॥कार्त्तिकस्यसितेपक्षेचतुर्दश्यांसमागमत्॥वैकुंठेशस्तुवैकुंठाद्वारा
णस्यांकृतेयुगे॥१॥रात्र्यांतुर्यांशशेषायांस्नात्वासौमनकर्णिके॥गृहीत्वाहेमपद्मानिसहस्रैकंततोव्रजेत्॥२॥अति
भक्त्यापूजयितुंशिवयासहितंशिवम्॥विधायपूजांवैविश्वेशीनंततःपद्मैरपूजयत्॥३॥सहस्रसंख्यांकृत्वादावेकना
म्नाततःपरम्॥आरब्धंपूजनंतेनशिवस्तद्भक्तिमैक्षत॥४॥एकंपद्मंपद्ममध्यान्निलीयात्तंहरेणतु॥ततःपूजितवा
न्विष्णुरेकोनंकमलंत्वभूत्॥५॥इतस्ततस्तेनदृष्टंपद्मंतिष्ठतिनक्वचित्॥कमलेषुभ्रमोजातोथवानामस्तुमेभ्रमः॥
६॥क्षणंविचार्यसहरिर्नमेनामभ्रमोभवत्॥पद्मेचैवभ्रमोजातोविचार्यैवंपुनःपुनः॥७॥सहस्रपद्मसंकल्पःपू
जार्थंतुकृतोमया॥अर्चेःकथंमहादेवएकोनकमलैर्मया॥८॥यद्यानेतुंगमिष्यामिभंगस्यादासनस्यतु॥अतः
परंकिंविधेयंचिंतोद्विग्नोहरिस्तदा॥९॥एकःप्रकारउत्पन्नोहृदयेस्यमुनीश्वराः॥नेत्रंमेपद्मसदृशंपद्मार्थेत्वर्पया
म्यहम्॥१०॥इतिनिश्चित्यमनसादत्वातर्जनिकांसतु॥नेत्रमध्यात्तदुत्पाट्यमहादेवस्तुपूजितः॥११॥ततो-
महेश्वरस्तुष्टोवाक्यमेतदुवाचह॥ ॥महादेवउवाच॥ ॥त्वत्समोनास्तिमद्भक्तस्त्रैलोक्येसचराचरे॥१२
॥राज्यंदत्तंत्रिलोक्यास्तेभवत्वंलोकपालकः॥अन्यंवरयभद्रंतेवरंयन्मनसेप्सितम्॥१३॥अवतारयमेवदास्या
मिनात्रकार्याविचारणा॥मद्भक्तिंयःसमालंब्ययेद्विषंतिजनार्दनम्॥१४॥तेमद्दृष्टानराविष्णोव्रजे-
युर्नरकंध्रुवम्॥ ॥विष्णुरुवाच॥ ॥त्रैलोक्यरक्षाकरणंममादिष्टंमहेश्वर॥१५॥दुर्मदाश्चमहास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वांदैत्यामार्याः कथंमया॥ ॥शिवउवाच॥ ॥एतत्सुदर्शनंचक्रंमहादैत्यनिकृंतनम्॥१६॥गृहाणभगवन्विष्णो—
मयातुभ्यंनिवेदितम्॥अनेनसर्वदैत्यानांभगवन्कदनंकुरु॥१७॥एवंचक्रंहरेर्दत्वाननतोवचनमब्रवीत्॥ ॥शिव
उवाच॥ ॥वर्षेचहेमलंबाख्येमासेश्रीमतिकार्त्तिके॥१८॥शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति॥महाब्देचतिथौ
ब्राह्मेमुहूर्तेमनकर्णिके॥१९॥स्नात्वावैश्वेश्वरंलिंगंवैकुंठादेत्यपूजितम्॥सहस्रकमलैस्तस्माद्भविष्यतिममप्रि
या॥२०॥विख्यातासर्वलोकेषुवैकुंठाख्याचतुर्दशी॥अन्यंवरंप्रदास्यामिशृणुविष्णोवचोमम॥२१॥पूर्वरात्रेतु
तेपूजाकर्त्तव्यासर्वजातिभिः॥उपवासंदिवाकुर्यात्सायंकालेतवार्चनम्॥२२॥पश्चान्ममार्चनंकार्यमन्यथानिष्फ
लंभवेत्॥यात्यातुहरिपूजायांरात्रिव्याप्ताचतुर्दशी॥२३॥अरुणोदयवेलायांशिवपूजांसमाचरेत्॥सहस्र
कमलैर्विष्णुरादौयैः पूजितोनरैः॥२४॥पश्चाच्छिवःपूजितश्चेज्जीवन्मुक्तास्तएवहि॥सायंस्नात्वापंचनदेबिं
दुमाधवमर्चयेत्॥२५॥सहस्रनामभिर्विष्णोःकमलैःसुमनोहरैः॥मनिकर्ण्यांततःस्नात्वाविश्वेश्वरमथार्चये
त्॥२६॥सहस्रनामभिःपुण्यैर्जीवन्मुक्तःसएवहि॥स्नात्वायोविष्णुकांच्यांवानंतसेनंसमर्चयेत्॥२७॥रुद्र
कांच्यांततःस्नात्वाप्रणवेशंसमर्चयेत्॥पृथिव्यांचश्रुतायेयेधर्माःप्रोक्तामनीषिभिः॥२८॥सर्वेषांफलमाप्नो
तिनात्रकार्याविचारणा॥आदौस्नात्वावन्हितीर्थेयजेन्नारायणंततः॥२९॥रेतोदकेततःस्नात्वाकेदारेशंसमर्च
येत्॥इहैवार्थवतानर्थोभवेन्नास्त्यत्रसंशयः॥३०॥स्थलपद्मैस्तत्रपूजाकर्त्तव्याजलजक्षयात्॥आदौस्नात्वासूर्य
पुत्र्यांवेणीमाधवमर्चयेत्॥३१॥जान्हव्यांचततःस्नात्वासंगमेशंप्रपूजयेत्॥रक्तपद्मैःश्वेतपद्मैर्हरिरुद्रौक्रमेणच ३५
॥३२॥सर्वाःश्रियस्तस्यवश्याःसत्यंविष्णोमयोदितम्॥मोक्षार्थंकाशिकामध्येबिंदुमाधवमीश्वरम्॥ ३३॥ नल—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेत्पूजयित्वाकिंमोक्षंनातारकंविना॥ विनायोहरिपूजांतुकुर्याद्रुद्रस्यचार्चनम्॥ ३४॥ वृथातस्यभवेत्पूजास
त्यमेतद्वचोमम॥ एवंतस्मैवरान्दत्वात्वंतर्द्धानंययौशिवः॥ ३५॥तस्मात्सर्वप्रयत्नेनपूज्यौहरिहरावुभौ॥ प्राप्तेक
लियुगेघोरेशौचाचारविवर्जिते॥ ३६॥तत्वसंख्यैर्वर्षशतैर्गतैर्देवोमहेश्वरः॥ वाराणसीस्थलिंगानिपातालेस
हिनेष्यति॥ ३७॥ ततोद्विगुणवर्षैस्तु गंगावाराणसीतथा॥ भविष्यतिअदृश्यासा तत्वसंख्युमुनीश्वराः॥ ३८॥
अंतर्हितायदाकाशीभविष्यतितदामुने॥ नाशस्तुलिंगचिन्हानांनिष्प्रभाःसकलाजनाः॥ ३९॥चतुर्दिशासु
दुर्भिक्षंमहामारीसमुद्भवः॥ गोवधश्चापिसर्वत्रमृत्तिकाभस्मसन्निभा॥ ४०॥ गांगतोयातुयाधारापतेद्भा
गीरथाश्रमे॥ हरिद्वाराच्चवायव्येतस्यालोपोभविष्यति॥ ४१॥ भागीरथ्यांगतायांतुमर्कटीतंतुसन्निभाः॥भ
विष्यंतिजलेकीटास्तोयंनीलीनिभंतथा॥ ४२॥ चतुर्वर्षसहस्रैस्तुशैलस्थाःसर्वदेवताः॥ सत्यंत्यक्त्वागमि
ष्यंतिमानसंचसरोवरम्॥ ४३॥ गतेषुसर्वदेवेषुराजानोधैर्यविच्युताः॥ पापिष्ठाश्चदुराचारानानेतिप
रपीडिताः॥ ४४॥ कलेरयुतवर्षाणिभविष्यंतियदाखग॥ श्रौतमार्गस्यलोपस्तुभविष्यतिनसंशयः॥
४५॥ तदालोकाभविष्यंतिमद्यपानपरायणाः॥ स्वल्पायुषःस्वल्पभाग्यानानारोगैश्चपीडिताः॥ ४६
द्विजास्तुदक्षिणेदेशेवेदज्ञाःसंभवंतिच॥ आनीयतान्शाकःकर्त्ताधर्मसंस्थापयिष्यति॥ ४७॥ इतिस
नत्कुमारसंहितायांकार्त्तिकमाहात्म्येद्वाविंशतितमोऽध्यायः॥ ॥वालखिल्याऊचुः॥ ॥कार्त्तिक्यांपू-
र्णिमायांतुकुर्यात्त्रैपुरमुत्सवम्॥ दीपोदेयोवश्यमेवसायंकालेशिवालये॥ १॥ त्रिपुरोनामदैत्येंद्रःप्रया
गेतपआस्थितः॥ लक्षवर्षंतपस्तप्तंत्रैलोक्यंसचराचरम्॥ २॥ तत्तपस्तेजसारब्धंदग्धंतुभुवनत्रयम्॥ नानादेवां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गनादेवैःप्रेषिताःसंविमोहितुम्॥३॥नतासांवशगःसोभूद्दर्षणैश्चापिधर्षितः॥नक्रोधमोहलोभानांवशोदैत्योनजा
यते॥४॥वरंदातुंययौब्रह्मानारदादिभिरन्वितः॥ ॥ब्रह्मोवाच॥ ॥वरंवरयभद्रंतेसंतुष्टोहंपितामहः॥५॥तप
सातुफलेसिद्धेकःक्लेशंसहतेजनः॥ ॥त्रिपुरउवाच॥ ॥अमरंकुरुमांब्रह्मन्करोमित्वन्यथातपः॥६॥दातुंश
क्तुंनचेद्ब्रह्मन्नन्यथागच्छसत्वरम्॥ ॥ब्रह्मोवाच॥ ॥मयापिबालमर्त्तव्यमितरेषांतुकाकथा॥७॥अवश्यंदेहिनांमृ
त्युःसंभाव्यंयाचयस्वमे॥ ॥त्रिपुरउवाच॥ ॥नमेमृत्युर्देवताभ्योमनुष्येभ्योनिशाचरात्॥८॥नस्त्रीभ्योनचरो
गेणदेत्येवंवरमुत्तमम्॥ब्रह्मापिचतथेत्युक्त्वासत्यलोकंजगामसः॥९॥एवंलब्धवरंज्ञात्वानानादैत्याःसमाययुः॥त
न्दैत्यानागतान्दृष्ट्वासोज्ञापयतदानवान्॥१०॥अस्मद्विरोधिनोदेवाधर्त्तव्याःसर्वएवहि॥नोचेद्यानिचरत्नानिदे-
वादीनांसमीपतः॥११॥गृहीत्वातानिसर्वाणिकुर्वंतूपायनंमम॥इत्याज्ञांतस्यशिरसिकृत्वातेसर्वदानवाः॥१२॥देवा
न्नागांश्चयक्षांश्चधृत्वाग्रेविनिवेदिताः॥प्रणम्यसर्वदेवास्तंत्रिपुरंचव्यजिज्ञपुः॥१३॥गृह्यतांदैत्यराजेंद्रयदस्माकंभ
विष्यति॥वयंकृत्वातुतेसेवांजीविष्यामोयथातथा॥१४॥इतिश्रुत्वावचस्तेषामधिकारच्युताःकृताः॥तेषांस्त्रियः
समानीयदेववेश्याःसहस्रशः॥१५॥एवंभास्करमुत्सृज्यसर्वेदेवास्तदाज्ञया॥चक्रुर्यथोक्तंदैत्यस्यद्वारस्थाःस
र्वएवहि॥१६॥सूर्यस्यनिकटेप्युक्तंमद्द्वारेस्थीयतांसदा॥तेनापिचतथेत्युक्त्वातद्द्वारेसंस्थितंक्षणम्॥१७॥ददाह
भवनंसर्वंस्वकरैःक्षणमात्रतः॥आदिष्टश्चततस्तेनस्वेच्छयागम्यतामिति॥१८॥ततोगतोसौभगवान्भुवनानिवि
भावयन्॥चक्रुर्देवास्तदाज्ञांचद्वारितिष्ठंतिवारिताः॥१९॥कदाचित्तस्यगेहेतुनारदःसमुपाययौ॥तेनापिपूजितोभ
क्त्यापप्रच्छस्वपराक्रमान्॥२०॥ ॥नारदउवाच॥ ॥ईदृशोजयघोषस्तुनकेनापिकृतोभुवि॥अस्मिंदेशेतुदैत्यें-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रक्किमिदानींनिगद्यताम्॥ २१॥ ॥त्रिपुरउवाच॥ ॥सर्वस्थलेषुमेकीर्तिर्नगताकिंनुनारद॥ मयाप्रस्थापितादै-
त्याः सर्वएवइतस्ततः॥ २२॥ ॥नारदउवाच॥ ॥यत्रयत्रगतोदैत्यस्तत्रतत्रप्रभुःसहि॥ तवनामनगृह्णातिवक्ति
चस्वपराक्रमम्॥ २३॥ इतिश्रुत्वामुनिस्तेनसद्यएवविदायितः॥ क्रोधश्चास्यमहान्जातःकिंकर्तव्यंमयाधुना॥
२४॥ विश्वकर्माणमाहूयवाक्यमेतदुवाचह॥ शीघ्रंकुरुत्रिधातूनांविचित्रकर्मन्पुरत्रयम्॥ २५॥ विमानतुल्यंय
न्मेच्छातत्रतत्रगमिष्यति॥ इतितस्यवचःश्रुत्वात्वष्टापिचतथाकरोत्॥ २६॥ रूपत्रयंसमास्थायत्रिपुरेषुसमाश्रि
तः॥ नारदस्यतुवाक्येनदैत्याबंदीकृतास्तदा॥ २७॥ पुरेणैकेनपाताले भ्रमतेत्रिपुरासुरः॥ स्वर्गेचापिपुरैकेनधर-
णीमटतेपुरा॥ २८॥ कांश्चित्संताडयत्येवंसंमारयतिकानपि॥ ददातिकेषांस्वामित्वंस्वेच्छाचारीमहाबलः॥ २९॥
तेनेत्थंपंचलक्षाणिसर्वेलोकाउपद्रुताः॥ तदादेवान्समागम्यनारदोवाक्यमब्रवीत्॥ ३०॥ ॥नारदउवाच॥ ॥पराक्र
मायास्तुतेधिक्कृदेवेंद्रक्कगतास्तिधीः॥ विचारयंतुभोदेवावधायत्रिपुरस्यच॥ ३१॥ इत्थंमुनिवचःश्रुत्वासलज्जोमृ-
द्धोसुरवः॥ पुन स्तंनारदःप्राहब्राह्मणंशरणंव्रज॥ ततउत्थायदेवेंद्रोगूढोदेवगणैःसह॥ ३२॥ नारदेनसमायुक्तः
सत्यलोकंजगामसः॥ तत्रापश्यत्सधातारमुवाचकरुणंवचः॥ ३३॥ ॥इंद्रउवाच॥ ॥धातरस्मद्गतिर्नास्तिहन्तनी
यास्त्वयावयम्॥ नासाग्रेसंस्थिताःप्राणास्त्रिपुरस्यतुशासनात्॥ ३४॥ इतींद्रवचनंश्रुत्वाब्रह्मासेंद्रोमुनीश्वरैः॥
सद्योवैकुंठमगमद्यत्रास्तेमधुसूदनः॥ ३५॥ तत्रगत्वामहाविष्णुंप्रणिपत्यस्थितासुराः॥ अनुग्रहीत्वादृष्ट्वातैं-
स्तंब्रह्मावाक्यमब्रवीत्॥ ३६॥ ॥ब्रह्मोवाच॥ ॥भगवन्देवदेवेशदेवापत्तिविनाशन॥ त्रिपुरासुरनिर्दग्धान्
किंदेवास्त्वमुपेक्षसे॥ ३७॥ ॥श्रीविष्णुरुवाच॥ ॥त्वयैवनाशितंब्रह्मन्दत्तानानाविधावराः॥ देवादिभ्यःकथंत-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमृत्युःसंभाव्यतेधुना॥३८॥नभासंतेविचारोमेतस्यमृत्यौसुरेश्वराः॥अस्तिकश्चिद्यदोपायःकथंवैकरवाण्यहम्॥३९॥
॥इतिश्रुत्वावचोविष्णोःसर्वेबुध्यातुकुंठिताः॥यदानोत्तुर्वकःकिंचिन्नारदोवाक्यमब्रवीत्॥४०॥ ॥श्रीनारदउवाच
॥ ॥कुर्वंतुरेवंदमादेवाउपायःकथ्यतेमया॥एकोदृष्टःसृष्टिमध्येनदेवोनचमानुषः॥४१॥नराक्षसोनवैदैत्योन
भूतोनपिशाचकः॥नसौपुमान्नचस्त्रीतुनजडोनचपंडितः॥४२॥नास्यतातोनवामातानभ्राताभगिनीनच॥तथै
वतस्यसंतानंसएनंमारयिष्यति॥४३॥ ॥ब्रह्मोवाच॥ ॥एतादृशःक्वदृष्टोसौसत्यंवालीकमेववा॥इतिब्रह्मवचः-
श्रुत्वाप्रोवाचजदीश्वरः॥४४॥ ॥श्रीविष्णुरुवाच॥ ॥अहोत्रैलोक्यनाथोसौमहादेवोवृषध्वजः॥ब्रह्मन्कथंवि
स्मृतोसौसनःकार्यंकरिष्यति॥४५॥इत्युक्त्वासर्वएवैतेशंकरंशरणंययुः॥ ॥देवाऊचुः॥ ॥देवदेवमहादेवदैत्ये
द्राङ्गृशपीडिताः॥४६॥त्वामेवशरणंप्राप्तास्त्रिपुरेणप्रपीडिताः॥ ॥श्रीशिवउवाच॥ ॥ब्रह्मंस्त्वयावरोदत्तउन्मत्तो
सौभवत्तदा॥४७॥मद्दिष्टोसिवरःकस्मात्पुनर्मारयसेकथम्॥मदीयंनाशितंतेनकस्माद्वध्योमयासुरः॥४८॥इति
रुद्रवचःश्रुत्वाहताशास्तेसुरास्तदा॥तादृशांस्तान्सुरान्दृष्ट्वाविष्णुर्वचनमब्रवीत्॥४९॥ ॥विष्णुरुवाच॥ ॥त्वया
प्रतिज्ञालोकानांपालनायसदाशिव॥कृतातस्त्वांसमायाताःशरणंसर्वदेवताः॥५०॥मयानानाविधंदुःखंदीयते
तुसदाशिव॥एतद्दुःखंमयाशक्यमपनेतुंयतोनहि॥५१॥अतस्त्वांयाचयाम्यद्यदेवान्बंदेर्विमोचय॥ ॥श्रीशि
वउवाच॥ ॥तववाक्यंकरिष्यामिसामग्रीनास्तिमेगृहे॥ममापराधरहितंहनिष्यामिनदानवम्॥५२॥ ॥विष्णु
रुवाच॥ ॥सामग्रींतुकरिष्यामिसंग्रामार्थंसदाशिव॥करिष्यतिकथंदैत्यःशंभोरन्यायमेवसः॥५३॥इतिविष्णु ३६
वचःश्रुत्वाहाकष्टमितिचाब्रवीत्॥अत्रागमिष्यत्यस्माकंशृणुयाच्चिपुरासुरः॥५४॥नविलंबोमृतौकुर्यात्किमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानींविधीयताम्॥ स्मरान्म्लानमुखान्दृष्ट्वानारदोवाक्यमब्रवीत्॥ ५५॥ ॥नारदउवाच॥ ॥सामग्रीक्रियतांशीघ्रमा
यातित्रिपुरासुरः॥ विष्णुंपलायितंदृष्ट्वाक्रुद्धोस्तीतिलोकयन्॥ ५६॥ मयानत्राशितंतस्ययद्दियास्यतिमत्स्थले
॥ योद्धुंतदावश्यमेवमयामार्यःसुदुर्मदः॥ ५७॥ इतिरुद्रवचःश्रुत्वासमानवस्तास्तुदेवताः॥ सामग्रींविष्णुरकरो-
द्युद्धार्थंसतुधूर्जटेः॥ ५८॥ बाणःस्वयंबभूवास्यवन्हिःशल्यंबभूवसः॥ वायुस्तुपुंखरूपोभूच्छेनाकंचधनुःकरोत्॥ ५९
॥स्यंदनंधरणीजातावेदाजाताहयोत्तमाः॥ विधातासारथिर्जातःपताकाचदिवाकरः॥ ६०॥ आतपत्रंचचंद्रोभूद्गणे
शाद्याःपदातयः॥ ततोवेगात्समुत्स्थनारदस्त्रिपुरंययौ॥ ६१॥ श्रुत्वानारदमायांतंसत्कारैरर्चयेच्चतम्॥ मुनेपुरा-
णिपत्रयाद्यत्वजेयानिस्मरासुरैः॥ ६२॥ त्रैलोक्येचाधुनाजातंत्वत्कृपातोयशोमुने॥ इतितस्यवचःश्रुत्वालल्लाटंकु-
टयन्मुनिः॥ ६३॥ तुष्णीमासीद्दसित्वैतदवलोक्यासुरोब्रवीत्॥ ॥त्रिपुरउवाच॥ ॥ किमर्थंचेदृशीचेष्टामुनेनाथ
कृतात्वया॥ ६४॥ मद्भाग्यसमभाग्यश्चेदस्तिकश्चिन्निगद्यताम्॥ ॥नारदउवाच॥ ॥ कैलासेतुगतश्चाहंदैत्येंद्रःशृ
णुवैभवम्॥ ६५॥ महेश्वरस्यकिंवाच्यंतल्लक्षांशोपिनत्वयि॥ इतितद्वचनंश्रुत्वानारदस्तुविदायितः॥ ६६॥ गृही
त्वादैत्यसंघान्स कैलासंत्रिपुरोययौ॥ तत्रदेवैर्महद्युद्धंजातंतत्रदिनत्रयम्॥ ६७॥ पश्चाद्रुद्रेणनिहतस्त्रिपुरश्चै
कबाणतः॥ कार्तिक्यांपूर्णिमायांतुसर्वदेवाःप्रतुष्टुवुः॥ ६८॥ तस्मिन्दिनेसर्वदेवैर्दीपादत्ताहरायच॥ सर्वथैवप्र
देयाश्चदीपास्तुहरतुष्टये॥ ६९॥ विंशतिःसप्तशतकाःसहितादीपवर्तयः॥ ददद्दीपंपूर्णिमास्यांसर्वपापैःप्र
मुच्यते॥ ७०॥ पौर्णिमास्यांतुसंध्यायांकर्त्तव्यःस्त्रिपुरोत्सवः॥ दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये॥ ७१॥ की
टाःपतंगामशकाश्ववृक्षाजलेस्थलेयेविचरंतिजीवाः॥ दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्राः॥७२॥ कार्तिक्यांतुवृषोत्सर्गंकृत्वानक्तंसमाचरेत्॥ शैवंपदमवाप्नोतिशिवव्रतमिदंस्मृतम्॥ कार्यस्तस्मात्पौर्ण
मास्यांत्रिपुरायमहोत्सवः॥७३॥ इतिसनत्कुमारसंहितायांकार्तिकमहात्म्येत्रिपुरोत्सवदीपन विधिर्नामत्रयोविं
शोध्यायः॥ ॥वालखिल्याऊचुः॥ ॥ अथोर्जव्रतिनःसम्यगुद्यापनमथोच्यते॥ कृते उद्यापनेसांगंव्रतंभवतिनि
श्चितम्॥१॥ उर्जशुक्लचतुर्दश्यांकुर्यादुद्यापनंव्रती॥ तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभाम्॥२॥ तुलसीमूल
देशेचसर्वतोभद्रमेवच॥ तिर्यगूर्ध्वंकृतारेखाऊनविंशतिसंज्ञकाः॥३॥ खंडेंदुःस्त्रिपदंकोणेशृंखलापंचभिःप
दैः॥ एकादशपदावल्लीभद्रंतुनवभिःपदैः॥४॥ चतुर्विंशत्पदावापिपरिधिर्विंशतिस्मृतः॥ मध्येषोडशभिःको
ष्ठैःपद्ममष्टदलंस्मृतम्॥५॥ खंडेदेवोवेदसंख्यावाप्योपरिवेतवर्णकाः॥ चतस्रःशृंखलाश्यामारक्तंभद्राष्टकं
स्मृतम्॥६॥ वल्यष्टकंनीलरूपंपीतस्तुपरिधिर्भवेत्॥ कमलंपंचरंगंतुयथाशोभंबुधोलिखेत्॥७॥ तस्योपरि
ष्टात्कलशंपंचरत्नसमन्वितम्॥ पूजयेत्तत्रदेवेशंसौवर्णंगुर्वनुज्ञया॥८॥ रात्रौजागरणंकुर्याद्गीतवाद्यादिमंग-
लैः॥ ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान्॥९॥ त्रिंशन्मितान्तदर्धंवाशक्त्यैकंवानिमंत्रयेत्॥ अतोदे
वाइतिद्वाभ्यांहोमयेत्तिलपायसम्॥१०॥ ततोवैकपिलांदद्यात्पूजयेद्विधिवद्गुरुम्॥ परात्रपौर्णिमास्यांतुयात्रास्यात्पु
ष्करस्यतु॥११॥ एवमुद्यापनंकृत्वासम्यग्व्रतफलंलभेत्॥ वरांदत्वाययतोविष्णुर्मत्स्यरूप्यभवत्ततः॥१२॥ तस्यांद
त्तंहुतंजप्तंतदक्षय्यंफलंभवेत्॥ कार्त्तिक्यांपौर्णिमायांतुविष्णुंनीराजयेत्सदा॥१३॥ प्रदोषसमयेराजन्नदा
रिद्र्यमवाप्नुयात्॥ कार्त्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनम्॥१४॥ सप्तजन्मभवेद्विप्रोधनाढ्योवेदपार
गः॥ एतानिकार्तिकेमासिनरःकुर्याद्व्रतानितु॥१५॥ इहलोकेशरीरंसंक्लेशयित्वाफलंलभेत्॥ नकार्तिकसमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासोविष्णुसंतुष्टिकारकः॥१६॥स्वल्पक्लेशैर्विष्णुलोकः प्राप्यकोनापरोभवेत्॥ इत्थंतैर्नैमिषारण्येवालखिल्यैरुदाहृतम्
॥१७॥भास्करस्यसुखाकृत्वातस्तानभिवाद्यच॥ ययौसूर्यस्यनिकटेकुर्वतोभास्कर स्तुतिम्॥१८॥ इत्येतत्सर्वमा-
ख्यातंकार्तिकस्यव्रतोत्तमम्॥ यत्कृत्वासर्वपापेभ्योमुक्तोभवतितत्क्षणात्॥१९॥ अतः परंकिंवक्ष्यामिब्रूह्यात्रे
यसत्वरम्॥२०॥ इतिसनत्कुमारसंहितायांकार्तिकमाहात्म्येउद्यापनविधिर्नामचतुर्विंशतितमोऽध्यायः॥ ॥
॥ ॥अत्रेयउवाच॥ ॥अद्भुतोयंत्वयाप्रोक्तोमहिमाकार्तिकस्यतु॥स्वस्यकर्तुमसामर्थ्येकथमेतत्कृतंभवेत्॥-
१॥ ॥कुमारउवाच॥ ॥नास्तिकर्तुंस्वसामर्थ्यमुपायात्प्राप्यते फलम्॥द्रव्यंदत्वाब्राह्मणायगृह्णीयात्फलमुत्तमम्
॥२॥शिष्याद्वाभृत्यवर्गाद्वास्त्रीभ्योवासाच्चकारयेत्॥तस्मादपिफलंगृह्णन् फलभाग्जायतेनरः॥३॥ ॥अत्रेय
उवाच॥ ॥अदत्तान्यपिपुण्यानिप्राप्यंतेकेनचित्क्वचित्॥ एतदिच्छाम्यहंश्रोतुंकौतुकंममवर्त्तते॥४॥ ॥सन-
त्कुमारउवाच॥ ॥अदत्तान्यपिपुण्यानिलभंतेपातकान्यपि॥येनोपायेनतद्ब्रूमिशृणुष्वैकमनाद्विज॥५॥कृत
तंवादृष्टंवाकृतमेकेनयत्कृते॥जायतेतस्यतद्राष्ट्रे त्रेतायांतुपुरोभवेत्॥६॥द्वापरेवंशमध्येतु कलौकर्तैवके
वलम्॥अज्ञानाद्यत्कृतंकर्मबाल्येस्वप्नेतुनफलम्॥७॥ अज्ञानाद्यच्चतारुण्येबाल्येतस्यफलंभवेत्॥ज्ञानपूर्व-
कृतंकर्मआजन्मांतंचतत्फलम्॥८॥ षण्मासंपापिसंगेननरः पापीप्रजायते॥ पापिनांवाधर्मिणांवासंसर्गाद्
द्वामासकम्॥९॥भोजनादेकपंक्तौचविंशांशः पुण्यपापयोः॥ एकासनेद्वयोर्वासात्सहस्रांशेनलिप्यते॥१०॥ये
वेयस्यान्नमश्नातिसभुंक्तेतस्यकिल्बिषम्॥जपादौपापिसंसर्गात्षोडशांशोविनश्यति॥११॥ परस्यस्तवनाद्यो
नादेकपात्रस्थभोजनात्॥ एकशय्याप्रावरणात्षष्ठांशः पुण्यपापयोः॥१२॥ पुरुषोहरतेसर्वभार्यायाऔरसस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ अर्द्धंशिष्याच्चतुर्थांशंपापंपुण्यंतथैवच॥ १३॥ भर्तुराज्ञाकरीनारीभर्तुस्त्वर्द्धंहपंहरेत्॥ यद्दस्तपक्कंभुंजीयाद्दशां
शंतदघंहरेत्॥ १४॥ वर्षाशनंतुयोदत्तेतदर्धाघस्यभागयम्॥ वर्षाशनार्धपुण्यंतुभुंक्तेवर्षाशनीनरः॥ १५॥ पुरोहित
स्यषष्ठांशंपापंचापुण्यमेववा॥ यजमानोसुनक्त्येव तद्दशांशंपुरोहितः॥ १६॥ उद्योगीचानुमंताच यश्चोपकरणप्रदः॥
षष्ठांशंपुण्यपापानांउपद्रष्टादशांशकम्॥ १७॥ यद्दस्तात्कार्यतेकर्मनान्नमस्मैप्रयच्छति॥ विनाभृत्यकशिष्याभ्यां
षष्ठांशंपुण्यमाहरेत्॥ १८॥ व्यवहारात्तथाप्रीत्यानित्यंसंभाषणादिभिः॥ दशांशंपुण्यपापानांलभतेनात्रसंशयः
॥ १९॥ अत्रैवोदाहरंतीममितिहासंपुरातनम्॥ वाराणस्यांकर्मदत्तोभरद्वाजकुलेभवत्॥ २०॥ वेदवेदांगवित्सू
ज्योजपध्यानपरायणः॥ सुशीलानामतद्भार्यासुशीलातरुणीशुभा॥ २१॥ एकदंतःसुतःसोपिसर्वविद्यामधी
तवान्॥ तारुण्यंसवयःप्राप्यकामाविष्ट स्तदाभवत्॥ २२॥ तस्यरूपावलीभार्याचतुरातीवसुंदरा॥ पतिव्र
तापितांहित्वासोपिकामवशंययौ॥ २३॥ परस्त्रीव्यसनात्तेन बहुद्रव्यंविनाशितम्॥ पितुर्दुःखभयाल्लोकानो
चुःकिंचिच्छुभाशुभम्॥ २४॥ मात्रानिवारितोभूयोव्यसनंसोत्यजन्नच॥ ततश्चपतितंभार्याधिक्करोतिसु
हृज्जनः॥ २५॥ महापात्रेवसुस्तेनपरस्त्रीव्यसनायसः॥ परस्त्रीव्यसना सक्त्यावयोनीतमजानता॥ २६॥
बहुभिःशिक्षितंनैवकरोतिचविमोहितः॥ ततश्चौर्यंसमारब्धंपरस्त्रीसुखलब्धये॥ २७॥ ततोलोकैश्च
तज्ज्ञातंभीत्याकाशयाःपलायितः॥ एकदंतस्तदाचिंतामुपलेभेकयाम्यहम्॥ २८॥ मार्गानभिज्ञोगच्छन्सश
नैर्देशान्विलोकयन्॥ देशाद्देशांतरंगच्छन्यमुनातीरमागतः॥ २९॥ स्नानार्थंकार्तिकेमासितत्रलोकाःस- ३८
मागमन्॥ कार्तिकव्रतिनस्तत्र नानादेशसमागतान्॥ ३०॥ नरान्ददर्शस्त्रीश्चापिसुरूपावयवान्विताः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्दृष्ट्वाकौतुकंपश्यन्नास्सेमेकमुवासह ॥ ३१ ॥ नतन्मध्येकोपिजनश्चेष्टितंतस्यदुर्मतेः ॥ संध्याकालेभ्रमंस्तत्रस्त्रीणांद
र्शनलालसः ॥ ३२ ॥ ददर्शब्राह्मणांस्तत्रजपदेवार्चनस्थितान् ॥ कांश्चित्पुराणप ठतः कांश्चित्तच्छ्रवणेरतान् ॥ ३३ ॥
नृत्यतोगायतः कांश्चिद्विष्णुस्तवनतत्परान् ॥ तुलसीधारिणः कांश्चिद्विष्णुमुद्रांकितान्परान् ॥ ३४ ॥ नित्यंपरि
भ्रमंस्तत्रदर्शनस्पर्शभाषणैः ॥ पुण्यात्मनांजनानांचपापंतस्यक्षयंययौ ॥ ३५ ॥ पौर्णिमास्यांततोपश्यद्विप्र
गोपूजनादिकम् ॥ दक्षिणाभोजनाद्यंचदीपदानादिकंतथा ॥ ३६ ॥ रात्रौदीपोत्सवंपश्यन् परस्त्रीकामुकः
सतु ॥ ततोर्धरात्रसमयेराजन्यस्यस्त्रियंबलात् ॥ ३७ ॥ जग्राहचालिलिंगासौदृष्टस्तत्पतिनातदा ॥ दृष्टमात्र
स्तुतेनाथतांविहायपलायितः ॥ ३८ ॥ एकदंतस्यमार्गेचसर्पोग्रेपतत्तदा ॥ पृदाकुनाततोदष्टः सद्योमृतिमुपा
ययौ ॥ ३९ ॥ बहवोमीलितास्तत्रवैष्णवाः पुण्यशालिनः ॥ एकदंतोद्विजः सोयंदष्टः सर्पेणदैवतः ॥ ४० ॥ किंकरि-
ष्यतियद्भाविनतत्केनापिवार्यते ॥ इत्यूचूरामरामेतिकेचिद्विष्णोशिवेतिच ॥ ४१ ॥ कर्णेजपस्तुतारेणस्वरेण
करुणान्विताः ॥ केचित्तुतुलसीमिश्रंजलंचिक्षिपुरादरात् ॥ ४२ ॥ यमदूतैस्तदाबद्धस्ताडितोनेकधाततः ॥
यमस्यसंन्निधौनीतस्तंदृष्ट्वासूर्यनंदनः ॥ ४३ ॥ अब्रवीच्चित्रगुप्तंवैकिमस्यदुष्कृतंकृतम् ॥ ॥ चित्रगुप्तउवाच ॥
॥ जानतानेनविप्रेणकृतंकर्माशुभंबहु ॥ ४४ ॥ तस्मान्निरयवासाययोग्योयंनास्तिसंशयः ॥ चित्रगुप्तवचः
श्रुत्वायमः प्रेतपमब्रवीत् ॥ ४५ ॥ ॥ यमउवाच ॥ ॥ प्रेतपैनंद्विजंशीघ्रंनरकेविनिपातय ॥ प्रेतपस्तुततोधृत्वात
विप्रंनरकेनयत् ॥ ४६ ॥ नानाभयानकान् दृष्ट्वानरकांस्तेनवैतदा ॥ भयकंपितआहेदंदृष्टंयथाजन्मविनाशितम्
॥ ४७ ॥ प्रेतपेनततश्चोक्तंनरकान्क्रमशोविश ॥ यदासौनाविशत्तत्रतैलतप्तेकटाहके ॥ ४८ ॥ कुंभीपाकाभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेक्षिप्तः प्रेतपेनहहानदा॥ प्रक्षिप्तोपिद्विजोनासौवेदनामापकामपि॥ दृष्ट्वाश्चर्यमयमायोक्तंप्रेतपेनकुतूहलात्॥
५०॥ कुंभीपाकेपरिक्षिप्तः सुखमास्तेयथान्हदे॥ जलस्यघर्मतप्तोहि यथायमभवद्विजः॥ ५१॥ तच्छ्रुत्वाधर्मराजो
पिकिमिदंकस्यकर्मणः॥ फलंविचारयेद्यावत्तावत्तत्रसमागतः॥ ५२॥ नारदः सर्वदर्शीचयमंप्रोवाचसादर
म्॥ ॥नारदउवाच॥ ॥एकदंतःसमानेयोनायमर्हतियातनाम्॥ ५३॥ अनेनकिलकालिंद्यामूर्जेमासि-
मागतैः॥ स्नानार्थंसज्जनैःसार्द्धंमासःसर्वोतिवाहितः॥ ५४॥ तेननपुण्यप्रभावेनक्षीणंपातकमस्यवै॥ अतः
प्रदर्शयनरकान्नेयोसौस्वर्गमेवहि॥ ५५॥ ततोनारदवाक्येनदर्शयित्वाद्विजस्यतु॥ नरकान्बहुदुःखाढ्या
नेकाशीतिप्रभेदकान्॥ ५६॥ ततोनीतःस्वर्गमसौपुण्यभोगायदेववत्॥ अतःसंसर्गजंपुण्यंपापंवापिभवे
ध्रुवम्॥ ५७॥ तस्मात्सतांसंगतयेयतितव्यंसुधीमता॥ असत्संगाद्यतःपुण्यमर्जितंचविनश्यति॥ ५८॥ इति
हासमिमंश्रुत्वाशुभंप्राप्नोतिमानवः॥ एवसत्संगमहिमाउक्तोन्यत्किंविवक्षितम्॥ ५९॥ इतिसनत्कुमारसं-
हितायांकार्त्तिकमासमाहात्म्येपंचविंशतितमोऽध्यायः॥ ॥अत्रेयउवाच॥ ॥ईदृशंकार्तिकव्रतमल्पाया
संमहत्फलम्॥ नकुर्वंतिजनाःकेचित्किमर्थंमुनिसत्तम॥ १॥ ॥कुमारउवाच॥ ॥स्वसृष्टिसुद्धयेवेधाधर्मा
धर्मौससर्जह॥ धर्ममेवानुतिष्ठंतःप्राप्नुवंतिशुभांगतिम्॥ २॥ अधर्ममनुतिष्ठंतोयांतितेधोगतिंनराः॥ पु-
ण्यकर्मफलंनाकोनरकस्तद्विपर्ययः॥ ३॥ तयोःपालनकर्त्तारौद्वावेवविधिनाकृतौ॥ शतक्रतुयमौतौचपु-
ण्यपापानुसारिणौ॥ ४॥ गुरुतल्पादयःपुत्राःकामस्यप्रथिताभुवि॥ क्रोधस्यपितृघाताद्याःलोभस्यतन-
याश्रृणु॥ ५॥ ब्रह्मस्वहरणाद्याश्चएतेनरकनायकाः॥ कृतायमेनतैर्व्याप्तामनुजानहिकुर्वते॥ ६॥ व्रतादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मकृत्यंयत्नैर्मुक्तास्तेहिकुर्वते॥ अश्रद्धाचैवदुर्मेधाअविद्यायाःकृतेउभे॥७॥ श्रद्धामेधाविद्यानित्यंवर्तेतेशुचिस
वेदा॥ ताभ्यांव्याप्तस्तुमनुजःश्रीविष्णोःश्रवणादिकम्॥८॥ नकरोतिसुदुर्मेधायेनांधंयातिवैतमः॥ ॥अत्रेय
उवाच॥ ॥ऊर्जव्रतोद्यापनादावशक्तःसिद्धिभाक्कथम्॥९॥ कथंविमुच्यतेजंतुर्दुःखसंसारसागरात्॥
॥ ॥सनत्कुमारउवाच॥ ॥शृणुयादूर्जमाहात्म्यंनियमेनशुचिःपुमान्॥१०॥ संपूर्णमथवाध्यायमेकंश्लो
कमथापिवा॥ ब्राह्मणान्भोजयेच्छक्त्यातेभ्योदद्याच्चदक्षिणाम्॥११॥ मुहूर्तंवापिशृणुयात्कथांपुण्यांदिने
दिने॥ यदिप्रतिदिनंश्रोतुमशक्तःस्यात्तुमानवः॥१२॥ पुण्यमासेथवापुण्यतिथौसंशृणुयादपि॥ तेनपुण्य
प्रभावेनपापान्मुक्तोभवेन्नरः॥१३॥ पुराणज्ञःशुचिर्दक्षःशांतोविगतमत्सरः॥ साधुःकारुणिकोवाग्मी
वदेत्पुण्यांकथांसुधीः॥१४॥ व्यासासनंसमारूढोयदापौराणिकोभवेत्॥ आसमाप्तेःप्रसंगस्यनमस्कुर्या
न्नकस्यचित्॥१५॥ नदुर्जनसमाकीर्णेनशूद्रश्वापदावृते॥ देशेनद्यूतसदनेवदेत्पुण्यकथांसुधीः॥१६॥
श्रद्धाभक्तिसमायुक्तानान्यकार्येषुलालसाः॥ वाग्यताःशुचयोदक्षाःश्रोतारःपुण्यभागिनः॥१७॥ अ-
भक्त्यायेकथांपुण्यांशृण्वंतिमनुजाधमाः॥ तेषांपुण्यफलंनास्तिदुःखंस्याज्जन्मजन्मनि॥१८॥ पौरा-
णिकंचसंपूज्यगंधवस्त्रादिभिःशुभैः॥ शृण्वंतिचकथांभक्त्यानदरिद्रानपापिनः॥१९॥ कथायांकीर्त्यमानायां
योगच्छत्यन्यतोनरः॥ भोगांतरेप्रणश्यंतितेषांदाराश्चसंपदः॥२०॥ उच्चासनसमारूढोननरःप्रणतोभवे
त्॥ विषवृक्षस्तथास्वापेवनेचाजगरोभवेत्॥२१॥ कथायांकीर्त्यमानायांविघ्नंकुर्वंतियेनराः॥ कोट्यब्दं=
नरकान्भुक्त्वाभवंतिग्रामशूकराः॥२२॥ येश्रावयंतिमनुजाःकथांपौराणिकींशुभाम्॥ कल्पकोटिशतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साग्रंनिश्चंनिब्रह्मणः पदे॥२३॥ आसनार्थंप्रयच्छंतिपुराणज्ञस्ययेनराः॥ कंबलाजिनवासांसिमंचंफलक
मेववा॥२४॥ परिधानीयवस्त्राणिप्रयच्छंतिचयेनराः॥ भूषणादिचयच्छंतिवसेयुर्ब्रह्मसद्मनि॥२५॥
वाचकेपरितुष्टेतुतुष्टास्युःसर्वदेवताः॥ अतःसंतोषयेद्भक्त्याभक्तिश्रद्धान्वितः पुमान्॥२६॥ तस्यपुण्य
फलंपूर्णंभवत्येवनसंशयः॥ यत्फलंसर्वयज्ञेषुसर्वदानेषुयत्फलम्॥२७॥ सकृत्पुराणश्रवणात्तत्फलंविं
दतेनरः॥ कलौयुगेविशेषेणपुराणश्रवणादृते॥२८॥ नास्तिधर्मःपरःपुंसांनास्तिमुक्तिपथः परः॥ पुराण
श्रवणाद्विष्णोर्नास्तिसंकीर्तनात्परम्॥२९॥ यएतदूर्जमाहात्म्यंशृणुयाच्छ्रावयेदपि॥ सतीर्थराजबदरी
गमनस्यफलंलभेत्॥३०॥ सर्वरोगापहंसर्वपापनाशकरंशुभम्॥ धनधान्यकरंमुक्तेर्निदानंकार्त्तिकव्रतम्॥
३१॥ विष्णुप्रीतिकरन्नानावांछितार्थफलप्रदम्॥ यःकरोतिनरोभक्त्यातस्यपुण्यफलंमहत्॥३२॥ इति
सनत्कुमारसंहितायांकार्तिकमासमाहात्म्येषड्विंशतितमोध्यायः॥२६॥ ॥छ॥ ॥छ॥ ॥छ॥॥

॥मुंबईंतबापूसदाशिवशेट्‌हशब्येश्रीवर्धनकरयाणींआपलेछापरवान्यात्छापिलें॥शके१७७६आनंदनामसंवत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिकार्तिकमाहात्म्यंसमाप्तम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=29.11.19 16:08
,TRANSFERRED=2019/11/29 at 16:18:22
,PAGES=85
,TYPE=STD
,NAME=S0002216
,Book Name=M-379-KARTIK MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection